CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लहरीदशकम्

राधावल्लभः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लहरीदशकम्

सादरमुपायनीकुरुते

प्रणेता

राधावल्लभः

प्रकाशिका

संस्कृतपरिषद्

सागरविश्वविद्यालयः

सागरम् - 470 003

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रथमं संस्करणम्

1991

मूल्यम् - 30 रूप्यकाणि

LAHARĪDAS'AKAM - Collection of ten laharī-kāvyas in Sanskrit by Radhavallabh.

Published by : Sanskrit Parishad, Saugar University, SAGAR-470 003 (M.P.)

First Edition 1991. Price Rs. 30/-

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

* अनुक्रमः *

1.	वसन्तलहरी ...	1
2.	निदाघलहरी ...	9
3.	प्रावृड्लहरी ...	14
4.	धारित्रीदर्शनलहरी ...	19
5.	जनतालहरी ...	27
6.	रोटिकालहरी ...	34
7.	नर्मदालहरी ...	43
8.	मृत्तिकालहरी ...	52
9.	अद्यापिलहरी ...	57
10.	प्रस्थानलहरी ...	65

* * *

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

1. वसन्तलहरी

शब्दा यथा स्मृतिमुपेत्य पुनर्विलीनाः
सीदन्ति चित्तजगति क्वचिदेककोणे ।
उद्भिद्यतेऽथ च विनाशमुपैति सद्यः
काव्याङ्कुरः कविमनःसु, तथा वसन्तः ।। 1

उक्तावुभौ च मधुमाधवमुख्यमासौ
वासन्तिकीं श्रियमहो तनुतः सुरम्याम् ।
मासो मधुः स इह नैव मधु व्यनक्ति
व्यत्येति शून्य इव माधवमास एवम् ।। 2

वासन्तिकर्तुमनुबध्य बध्नन् काव्यं
बन्धो इति प्रकुरुते बहुधाऽनुबन्धम्, ।
दूर्वा - विकासनपरः किल भास्करोऽयं
पत्रौरतां करततिं कवये प्रहिण्वन् ।। 3

अन्वेषणं तु विदधे बहुशः समन्ता-
न्नेतुं वसन्तसमयं नयनायनं स्वम् ।
व्यस्तः समस्तजगति प्रविभक्तरूपो
गूढं क्वचित् स निलये विलयं प्रयाति ।। 4

आयाति नैव सुमुखी तु रसालकुञ्जे
पुञ्जे गृहेषु बहुकृत्यभरे विलीना ।
छिन्ना भवन्त्यतितरां मनसोऽभिलाषाः
शाखा इवाम्रविटपस्य खरैः कुठारैः ।। 5

विस्थाप्य पूर्वलसितं सहकारकुञ्जं
स्वैरं प्रसर्पतितरां गुरुसौधपुञ्जः ।
अन्तर्निगीर्य स परः प्रकृतं समस्तं
स्वैरं विजृम्भत इवातिशयोक्तिकाव्ये ।। 6

अर्वाक्तने क्वचन कुञ्झटिकाप्रणष्टं
तं मार्गये स्वसमये सततं वसन्तम् ।
आ प्रातरानिशमहं बहुकृत्यसक्तो
जिघ्रामि गन्धमिव चास्य यदा कदाचित् ।। 7

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सायं त्ववाप्य समयं भ्रमणाय यातो
गच्छामि निर्जनपथे नतमस्तकोऽहम् ।
द्वित्रानस्थितान् निभृतमत्र विलोकयामि
वृक्षान् विषण्णहृदयानिव सज्जनांस्तान् ।। 8

कन्थां विमुच्य यदमी किल जीर्णपर्णां
प्लुष्टाः स्थिताः समयदावतनूनपाता ।
अस्ताचलस्थ - रवि - रक्त - कर - प्रवाहे
स्नाता जलेऽतिलुलिते मुनयो व्रतस्थाः ।। 9

सङ्क्षिप्यमाण - रवि रश्मि - समूहजाले
जालं स्वकीयमपि सङ्क्षिपतीह काले ।
सान्ध्ये स धीवरजनो वडिशप्रसक्तं
मत्स्यं प्रगृह्य च तटान्तिकमेति नक्तम् ।। 10

जाले निबद्ध इह स स्फुरतीव - वेल्लन्
पाशेन पीडिततनुश्च वसन्तमत्स्यः ।
उच्छ्वास - निःश्वसितयोरिव चान्तराले
मध्ये त्रिशङ्कुरिव चैव विलम्बमानः ।। 11

वासन्तिकी दहति यत्र समस्तशोभा
भूमण्डले ज्वलति सङ्गर - तीक्ष्णवह्नौ ।
छायाश्चरन्ति कुसृताः पिशिताशनानां
तैलेन सागरजलं परिदूषयन्त्यः ।। 12

वाता निवात इव ते ऽपि शनैः सरन्ति
फुल्लन्ति पुष्पनिकराण्यपि सूचिभेदैः ।
तूणार्धकृष्टमपि पुष्पशरं मुमुक्षुः
शङ्के च संहरति तं मदनः सशङ्कः ।। 13

दूराददृश्य इव पश्यति विश्वयुद्धं
सम्भावितं भयकरं बत भीतभीतः ।
सोऽयं वसन्तसमयः समयातिपातात्
क्षीणो विनिःश्वसिति किञ्च शनैरुपैति ।। 14

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं वसन्तसमयं विगतं विलीनं
चास्मिन् वसन्तसमये प्रविलोक्य भूयः ।
खिन्ना भृशं विनिपतन्ति धरातलेऽमी
जीर्णाश्च पर्णनिचया द्रुमसन्ततीनाम् ।। 15

वृद्धोऽस्थिशेष इव कूटचयैर्वृतो ऽयं
जीर्णः शिशुं तमिह वृक्षततेस्तथाङ्के ।
विन्ध्यः पितामह इव प्रयतो वसन्तं
पौत्रं च लालयति रुग्णतरं कृशं स्वम् ।। 16

यानागमव्यतिकराकुलिताश्च मार्गाः
पित्रोलगन्धपरितपूरितदिङ्मुखास्ते ।
धूमः प्रसर्पति च राजपथे पुरेऽस्मिन्
धूलिं बिभर्ति वसुधाऽसितडामराङ्का ।। 17

धूमावृतानि वदनानि तथाध्वगानां
वायुं प्रदूषणयुतं निगिरन्ति भूयः ।
धूल्याकुलानि विविधानि च वाहनानि
निष्पिष्य गाढमिह यान्ति वसन्तशोभाम् ।। 18

सिन्धोरपारनवनागरसभ्यताया
उद्भूतमत्र मथनादमृतं विषं च ।
तच्चोभयं गिलति सैष वसन्तकालः
पीताम्बरो ऽपि ननु भाति च नीलकण्ठः ।। 19

ऐश्वर्यनाशविनिवृत्तसमस्तभोग्याद्
भृत्या भवन्ति विमुखाश्च यथा प्रभोस्ते ।
व्यग्रा ऋतोर्विविधकृत्यभरे प्रसक्ता
वासन्तिकादपि जनाः शिथिलीभवन्ति ।। 20

पक्षौ विधूय किल तित्तिलिका निकामं
पौष्पं मधु भ्रमति सापि गवेषमाणा ।
प्राप्नोतु सा मधु कथं कुसुमप्रसूतौ
विष्टम्भिते सकल एव लताप्ररोहे ।। 21

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्तम्भेन विद्युत इहाततलोहतन्त्रा -
वुत्तानपादमवनम्य शिरः स्वकीयम् ।
व्यालम्बते मलिन - चर्मचरो विहङ्गो
व्यत्यासमेव बत सृष्टिगतं विवृण्वन् ।। 22

कण्ठः कषायविकृतः शिशिरेण जातः
पुंस्कोकिलस्य यदयं स्खलितं चुकूज ।
भृङ्गा उपेत्य वसतिं सहसास्मदीयां
भित्तौ विघट्य विलुठन्ति च कुट्टिमे ते ।। 23

मुग्धः स्वनीडरचनाकुलितश्च पक्षी
श्रान्तस्तृणस्य निचयं सततं विचिन्वन् ।
घट्टस्य पट्टयुगमध्यगतं वसन्तं
गोधूमधान्यमिव पश्यति पिष्यमाणम् ।। 24

भूतं च भव्यमनिशं भवितव्यतां तां
मध्ये निलम्बितमिदं किल वर्तमानम् ।
विस्मृत्य सर्वमपि साधयति स्वमर्थं
सर्वस्वमेव गिलतीह च राजनीतिः ।। 25

साम्राज्यवादशिशिरः कुणपोऽन्तरासा
वातङ्कवादखलता च बहिर्निदाघः ।
उत्कायमान उभयोरिव चान्तराले
व्यक्तिं प्रयातु कथमेष वसन्तकालः ।। 26

शब्देषु तेषु बहुलेषु सुपुष्पितेषु
प्रोल्लासि - वाग् - विपुल - पल्लविते विताने ।
रूढाङ्कुरेषु नगरे नवसंस्कृतीना-
माभास एव किमु शिष्यत एष चास्य ।। 27

ताङ्गाख्य - वाहनगताश्च हया व्यथन्ते
रामस्य दुर्बलतराश्च रहीमबन्धोः ।
धर्मस्य राजनय - कञ्चुक - संवृतां यद्
राष्ट्रे रथाः प्रविचरन्ति लसत्पताकाः ।। 28

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उत्सारितो विगतलक्ष्म - रसालकुञ्जा-
च्छून्याभ - नष्टमधुनो विरलद्विरेफात् ।
सोऽयं सरत्यहह भिक्षुकवच्च तूष्णीं
घण्टापथे नगरमध्यगते वसन्तः ।। 29

राधा - तदीयदयितोज्झितगोकुलेभ्यो
गोपीविहीन - यमुनापुलिनात् पुनश्च
लालित्य - मण्डित - लवङ्गलता - विहीनाद्
दूरं प्रयाति च विषण्ण इवेह सोऽयम् ।। 30

द्वन्द्वेऽत्र साम्प्रतिकनूतनसभ्यताया
रीत्या पुरा प्रचलितैर्व्यवहारजातैः ।
विस्थापितश्च शरणार्थिसमो वसन्तो
गेहं परत्र विवशस्त्वनुसन्दधाति ।। 31

प्राप्ता विकारमिह सम्प्रति सर्व एव
सौन्दर्यसारसमुदायमयाः पदार्थाः ।
द्रष्टुं च शक्यमपि तत् किल सोपनेत्रैः
कैश्चिद् वसन्तलसितं सितवस्त्रयुक्तैः ।। 32

त्यक्त्वा स्वकीयमखिलं च निसर्गभावं
प्रत्यक्षमत्र खलु नापि विभाव्यमानः ।
चित्ते विपर्ययततिं विकृतिं विवृण्वन्
क्रीडत्यहो च्छलनया तु वसन्तकालः ।। 33

स्वैरं प्रलोभनपरा लसतीह भव्या
चित्रच्छविर्बहलवर्णविशेषरम्या ।
गेहेषु कृत्रिमविभाकृतचाकचिक्या
सा दूरदर्शनगताऽनुकृतिस्तदीया ।। 34

छात्राश्च भित्तिषु लिखन्ति निरर्गलानि
वाक्यानि शिष्टजनवक्रदृशेक्षितानि ।
तापं तदक्षरगतं किल भावयन्त्यः
किञ्चिद् भवन्ति चपलाश्चटुलाश्चिरण्ट्यः ।। 35

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जीर्णे जराप्रशिथिले विकलेऽपि गात्रे
सद्यो वसन्तचुलुकं विदधात्यवश्यम् ।
क्षिप्तो मुखे करतलेन विषस्वरूपः
संस्कारितो ऽपि सुधया सुधियां तमाखुः ।। 36

उत्कोचराशिमधिगत्य सुखेन कश्चित्
पीत्वा प्रमादमदिरामधिकारमत्तः ।
वासन्तिके विहरतीव सदाऽधिकारी
कार्यालयेऽप्यकृतकृत्य - कुकृत्यसक्तः ।। 37

यावत् त्वसौ स्फुरति नृत्यति रिङ्गतीव
स्फारप्रफुल्लसमदप्रमदासमूहे ।
होलोत्सव - प्रखर - पिञ्जर - दिङ्मुखेभ्यः
सोल्लासमत्र नगरे स ऋतुर्वसन्तः ।।

तावन्मलीमसजुगुप्सितकर्दमानां
क्षेपाः शठैश्च विहिता घृणितप्रचारैः ।
मर्दैर्विमर्दविकृतैः कृतडम्बरैस्तैः
सम्मूर्च्छिता विषरसेन वसन्तशोभा ।। 38-39
(सन्दानितकम्)

क्षेत्रेषु भान्ति ततयो वितताः स्फुरन्त्यो
गोधूमधान्यपरिलम्बितसस्यराशेः ।
आराद् भुवि प्रकटितं विलसत्सुवर्णं
स्वर्णं विकीर्णमिह याभिरिदं समस्तम् ।।

माङ्गल्यमेव निखिलं नववत्सरेऽस्मिन्
दैवादियं खलु कृषिः फलिता प्रपूर्णम् ।
इत्थं मनोरथशतैरिव वाहितास्ते
यावत् कृषीवलजनाः सफलश्रमाः स्युः ।।

तावद् ववर्ष तुमुलं करकैस्तु देवो
गोधूमसस्यनिवहः शयितो धरण्याम् ।
ध्वस्तो मनोरथनवाङ्कुरपुण्यराशिः
क्रोशन्ति भाग्यसरणिं कृषका दरिद्राः ।। 40-42
(विशेषकम्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लुप्तोऽपि नाम विकृतिं च तथा गतो वा
द्रष्टुं न शक्य इति नास्ति वसन्तकालः ।
आविष्करोमि सहसा क्वचिदेनमत्र
पङ्के प्रफुल्लमिव तत् सहजं प्रसूनम् ।। 43

आयामि गेहमिह दीर्घ-बहिःप्रवासाद् -
धास्यच्छटां निजसुतावदने निरीक्षे ।
तस्यां वसन्तसृदशं कमनीयरूपं
पश्यन् विषादजलधेरिव चोद्धृतोऽहम् ।। 44

रम्या ललामललनापरिरम्भलीला
आलिङ्गनानि सुरतानि तथोपगूढम् ।
पुन्नाग - केसर - विकासि - लता - प्रसूनैः
संरोचितां प्रमदवन्यभुवः श्रियंताम् ।।

मोट्टायितं मधुरकुट्टमितं भ्रुवां तद्
वक्रत्वमङ्गवलनं सुकुमारभावम् ।
सीत्कारभिन्नमधरत्रुटिताक्षराणां
विच्छित्तिवक्रमुपचारवचःप्रपञ्चम् ।।

काव्याङ्गणं समवतारयितुं समीहे
सर्वं पुरातनमिदं नहि वर्ण्यजातम् ।
त्यक्त्वा चमत्कृतिततिं प्रतिबिम्बकल्पां
वासन्तिकं विशदयन्तु गिरो मदीयाः. 45-47
(विशेषकम्)

पश्यामि नूतनतनौ प्रकटीभवन्तं
नव्यां तथेह वसतिं परिकल्पयन्तम् ।
सङ्घर्षयुक्तजनजीवनचक्रवाते
तं चोल्लसन्तमनिशं बहलं वसन्तम् ।। 48

चुल्लीं पुरो निजकुटुम्बजनाय साध्वीं
साध्व्या गृहे रसवतीं किल साधयन्त्याः ।
वाञ्छत्यसौ निवसितुं वसने हरिद्रा-
कुस्तुम्बरीतिलकिते रुचिरे गृहिण्याः ।। 49

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भूमिं खनित्रचलितैः खनतां स्वशक्त्या
दूर्वाङ्कुराढ्यधरणीं क्षुरतां क्षुरप्रैः ।
स्वेदाम्बुपूर्वविगलन्मधुगण्डपालीः
सोऽयं वसन्तसमयः श्रयते जनानाम् ।। 50

सुस्पष्ट - सुन्दर - सुवाच्य - लिपि - प्रकृष्टं
यन्त्रेण टङ्कणकरेण च कर्गदेषु ।
यट्टङ्कितं निखिलमेव मनोगतं मे
पश्यामि तत्र सकलं च वसन्तलेखम् ।। 51

यावल्लिखामि विचरामि वदामि यावद्
यावत् समुच्छ्वसिमि निर्भय एव, तावत् ।
वागर्थसख्यमिव मेऽधिगतं वसन्तं
नोच्छेत्तुमस्ति विभवोऽपि च देवतानाम् ।। 52

सैषा वसन्तलहरी प्रभवेत् प्रमार्ष्टुं
क्लेशस्य लेशमपि दीनजनस्य जातु ।
साफल्यमस्य निजवाङ्निचयस्य मन्ये
तस्मै जनाय रचनां च समर्पये स्वाम् ।। 53

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

2 निदाघलहरी

(1)

दाहं दाहमयं लोकानीतिभीती: प्रसारयन् ।
आतङ्कवादिखलवन्निदाघो दाघमश्नुते ।। 1

अभिसन्धिविदीर्णा भू: शोषिता स्नेहवर्जिता ।
शोषितानां जनानां सा मनोभूर्विक्लवा यथा ।। 2

ग्लपयन् रसवर्जं स शोषयन् निखिला: प्रजा: ।
निदाघो निर्दयं शास्ति क्रूरो भूमिपतिर्यथा ।। 3

उच्छ्वसन् नि:श्वसन् वह्निं दीपयन् सर्वतोमुखम् ।
लौहकारस्य भस्त्रेव लोक: प्रध्माप्यतेऽनिशम् ।। 4

निष्कृपं स्वकरांस्तीक्ष्णान् प्रक्षिपन्नेष भास्कर: ।
अक्षैर्दीव्यत्यहो प्राणैर्जनताया: पणीकृतै: ।। 5

(2)

जना अन्नजलाभावाद् भ्रामं भ्रामं दिवङ्गता:।
इरणे तृषिता: क्षीणा भ्राम्यन्त: पशवो यथा ।।6

राजस्थाने मृता बाला: पिपासाकुलिता नव ।
तथा गुर्जरदेशेऽपि मृता गावो बुसं विना ।। 7

गोमाता म्रियते लोका बुसं देयं तृणादिकम् ।
इत्याह्वयति धर्मात्मा नेता चैवानुभाववान् ।। 8

तृणानां प्रेषयन् राशीर्गोभ्यो यानेन सत्वरम् ।
म्रियन्तेऽत्र नरा:क्षुद्भ्य इति किं नैव पश्यति ।।9

बुभुक्षित: करोत्येव पापानीति वचो वृथा ।
उदरम्भरय: किं किं पापमत्र न कुर्वते ? ।10

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(3)

यथा तथैव सायासं रक्ष्यते गृहवाटिका ।
गृहिण्याऽलाबुकूष्माण्ड्यौ फ़लिष्यत इतीप्सया ।। ।1

कुत्र कस्मिन् प्रदेयं स्याज्जलं स्वल्पं तु पादपे ।
रक्षणीयं गृहे वा स्यात् स्नानाय क्षालनाय वा ।। ।2

इति चिन्तातुरा म्लाना गृहिणी वाटिकास्थिता ।
सेचनं कुरुते प्रातर्जलैश्चुलुकमात्रकैः ।। ।3

पिपासाकुलितः पक्षी पयोधानेन सिञ्चतीम् ।
निर्वर्णयति तामुकस्तत्क्षणोज्झितपादपाम् ।।।4

प्रदत्तमञ्जलिप्रायं जलं तूर्णं प्रशुष्यति ।
आलवालमथ प्राप्य पक्षी पश्यति कर्दमम् ।। ।5

(4)

अवस्थानेषु हट्टेषु पिपासापीडिता नराः ।
बम्भ्रामति जलं पातुमन्विष्यन्तः प्रणालकम् ।। ।6

जलमादातुमुत्कानां प्रतीक्षाकुलितात्मनाम् ।
लोकप्रणालके पङ्क्तिः स्त्रीणां दीर्घा प्रजायते ।। ।7

सद्यो जलव्यवस्था स्यादित्याश्वासयति प्रजाम् ।
'मारुतिं' च समारुह्य महापौरः समागतः ।। ।8

सहठं स्वघटं चाग्रे स्थापयन्तीं तु पृष्ठतः ।
कटूक्त्या वारयत्येषा हस्ताहस्तिकयाऽथवा ।। ।9

पिपासाकुलितः पान्थोऽधरोष्ठं जिह्वया लिहन् ।
अनादाय जलं याति कलहं वीक्ष्य चानयोः ।। 20

(5)

दाववह्निः प्रकुरुते खाण्डवे ताण्डवं तथा ।
अर्जुनेनार्जुना दग्धाः शरविद्धा यथाऽखिलाः ।। 2।

करदर्वीः खराश्चैताश्चालयत्यथ भास्करः ।
धरा महाकटाहेऽस्मिन् भर्जिता मानवा भृशम् ।। 22

ऐषमो ग्रीष्म एतानि नीध्राणिच्छादितान्यहो ।
आभीरपल्ल्यां गोपालैः श्रमिकैः स्वगृहेषु वा ।। 23

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बभञ्जैतानि झञ्झाभिः प्रबलोऽयं प्रभञ्जनः ।
अद्रिशृङ्गाणि हरते यथा वीरोऽञ्जनासुतः ।। 24

ज्वलत्यथ धरा शुष्का जीवनं प्रज्ज्वलत्यहो ।
प्रदीप्ते वह्निना गेहे कूपं खनति शासनम् ।। 25

(6)

श्वसुरालयसम्प्राप्ता पीड्यमाना वधूरिव ।
छायां छायाप्यहो कोणे मार्गमाणा लयं गता ।। 26

शीतयन्त्रगलत्तापक्षपितातपसद्मसु ।
शेरते विपुलामोदं धनिका अधिकारिणः ।। 27

धगद्धगज्ज्वलज्ज्वालाजिह्वास्वग्नेर्निरन्तरम् ।
तृषा लपलपं दीप्तमुच्छलन्त्या महाध्वरे ।। 28

ब्रह्माण्डस्य महावेद्यां भूगोलं याजको रविः ।
आदीप्ताखिलमध्याह्ने जुहोत्याहुतिभिः समम् ।। 29

तप्तायःपिण्डवद्दीप्ते शून्ये घण्टापथे मुहुः ।
हिमगोलकविक्रेतुराह्वानं विचरत्यहो ।। 30

(7)

एतद्घर्मपरिक्लिष्टं सन्ध्यायां तारकाञ्चितम् ।
नभः संलक्ष्यते तापात् स्वेदविन्दुविचित्रितम् ।। 31

ऊष्मा ग्रीष्मसमुत्तप्तः पिपासाकुलितो भृशम् ।
लेढि स्वेदद्रवस्रावं नराणां चर्मणोऽनिशम् ।। 32

धूलिं नेत्रे विनिक्षिप्य झञ्झेयं सान्द्रमर्मरा ।
विहसन्ती विनिर्याता चेत्वरा नर्मकौतुकात् ।। 33

तालपत्रं करे धृत्वा शयानोऽयं गृहाद्बहिः ।
खट्वास्थः स्थविरो वायुं नैव वातीति शप्तवान् ।। 34

अप्रकम्पतृणे काले निर्वातेऽखिलभूतले ।
केवलं पत्रमेकं तत् कम्पतेऽश्वत्थपादपे ।। 35

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(8)

अनिशं हृतवन्यश्रीर्नष्टसत्वो भयार्दितः ।
खिन्नस्तिष्ठति विन्ध्योऽयं खल्वाटः स्थविरो यथा । 36

वृक्षा ऋक्षा वराहाः क्व सिंहा व्याघ्रा मृगा गताः ।
इत्यगस्त्यगतामाशां सोत्कण्ठश्च निरीक्षते ।। 37

आतपस्य स्वर्णराशिं सहस्रैः स्वैः करै रविः ।
वितरत्यादिनान्तं स च्छत्तीसगढजङ्गले ।। 38

शाखाबाहून् समुत्थाप्य तं च गृह्णन्ति वृक्षकाः ।
अहम्पूर्विकया चैते भिक्षुका इव लोभिताः ।। 39

पल्लवाङ्गुलिविस्रस्तं पतितं तं क्वचित् क्वचित् ।
धरा गृह्णाति साऽत्यल्पं सुवर्णकणमञ्चले ।। 40

(9)

समारूढनभोमञ्चो गर्जन् मेघो न वर्षति ।
भाषमाणोऽक्रियो नेता जनतायाः पुरो यथा ।। 41

द्यामुत्तीर्य विलीयन्ते मेघाश्छलसमन्विताः ।
शुष्को म्लायति केदारः क्षेत्रेषु ग्रामसीमनि ।। 42

काष्ठलोलुपवित्तेशैरवनी चावनीकृता ।
नग्ना दीना न रमते दरिद्रा जनता यथा ।। 43

दुःशासनेन पाञ्चाली कृष्यमाणाञ्चला यथा ।
धरित्री दूयमानास्ते वन्यवस्त्रनिकृन्तनैः ।। 44

मध्याह्ने श्रमिकान् कृत्ये योजयन् कर्षयन् प्रजाः ।
भीष्मो ग्रीष्मः स्थितः क्रूरः पणकृत् कृपणो यथा ।।45

(10)

मूर्च्छन्ती कविताधारा पाषाणैर्घट्टते जडैः ।
व्यथते विधुरा चित्ते रचनावचनावली ।। 46

चोरयन्नाननं स्वीयं निःशब्दो निर्गतो द्रुतम्
सन्देशप्रापणं मेघो प्रत्यादिशति धाष्ट्र्यतः ।। 47

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कथं सम्भाव्यते वाद्य मेघदूतप्रकल्पनम् ।
शुष्के मरुस्थले वाणी शीर्णा जर्जरतां गता ।।48

यक्षः प्रतीक्षते कामी कदा मेघः समेष्यति ।
वन्ध्येयं वसुंधा कृत्स्ना शापमुक्तिं च काङ्क्षति ।।49

कुतो यक्षः कुतो मेघः सन्देशप्रापणं कुतः ।
विच्छिन्नाभ्रविलायं तल्लयं याति मनोजगत् ।।50

विवर्धमानतापस्य परिणामविनिश्चयात् ।
जनश्चैव कविश्चैव स्थितौ निर्वचसाविव ।।51



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

3 प्रावृड् - लहरी

1

समायाता इमा वर्षाः श्यामाग्रैः स्वपयोधरैः ।
पाययन्त्यः पयस्तूर्णं प्रजाभ्यो मातृवत्सलाः ।।

जगत्प्रपञ्चसंसक्तमीतिभीतिसमाकुलम् ।
मेघालोकेऽन्यथावृत्ति चित्तमुच्छ्वसित मनाक् ।।

जननी द्यौः सुखासीनमिमं विन्ध्यं शिशुं यथा ।
मेघहस्तैश्चुलुकितैः स्नपयत्यत्र मोदितम् ।।

कूजद्भिश्चातकैर्नित्यं मयूरैश्च कुशीलवैः ।
प्रावृट्प्रवेशमालक्ष्य ध्रुवा प्रावेशिकी[1] कृता ।।

आकाशरङ्गपीठस्थैः समागत्य बलाहकैः ।
पूर्वरङ्गप्रसङ्गेऽस्मिन विहिता परिघट्टना[2] ।।

2

क्वचिद् दृष्टा क्वचिल्लुप्ता सूचितं वस्तु गूहते ।
विद्युन्मालविका नाट्यं छलितं कुरुते नु किम ?

झलज्झलारवं[3] - श्चैष निनादयति झल्लरीम् ।
झर्झरो[4] झर्झरीकं[5] स्वं कम्पयन्निव ताण्डवे ।।

सृष्टेरस्मिन् महानाट्ये पर्जन्यस्तु बलाहकम् ।
मृदङ्गमिव सन्ताड्य गम्भीरं गुञ्जयन् स्थितः ।।

वंशिकामिव वंशेषु पलाशेष्वथ वल्लकीम् ।
कस्तीरावृत[6] - नीध्रेषु वादयन्त्यथ झल्लरीम् ।।

---

1. नाट्ये पात्रप्रवेशावसरे प्रयुज्यमाना गीतिः ।
2. पूर्वरङ्गेषु नाट्यशास्त्रे पठिता । 'तन्त्रयौजःकरणार्थं तु भवेच्च परिघट्टना-इति लक्ष
3. आसारपतनशब्दः, 4. झर्झरः शिवः, 5. झर्झरीकं शरीरम्,
6. Tin-shed इत्याङ्गलभाषायाम्.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रुद्रवीणामिवांश्वत्थे शंततन्त्रीं महाह्रदे ।
कुतपं[7] कुरुते प्रावृट् पूगस्थूलैः पृषन्तिभिः ।।

3

पणवस्य च शङ्खस्य घोषा आनकदुन्दुभेः ।
कोणाघातेन गर्जद्भिः क्रियन्तेऽद्य बलाहकैः ।।

पवनं जवनं चाश्वमारुह्यैष महाबलः ।
पर्जन्यः पृथिवीलोके विजिगीषुरिव द्रुतः ।।

जययात्रासमारम्भे सीकरस्पर्शनर्तिताः ।
लाजाञ्जलीन् प्रयच्छन्ति पुष्पब्याजेन वल्लयः ।।

विद्युल्लेखाकशाघातैर्बाणैरासारवर्षिभिः ।
प्रकुट्टिद्धतो निदाघोऽयं कम्पते भययन्त्रितः ।।

तापयन् सततं लोकान् दुःशासनमिवाहितः ।
घर्मोऽधर्मवशान्नूनं सङ्कुचन् विलयं गतः ।।

4

आकाशपात्रं पर्जन्यो विपर्यस्तमुखं व्यधात् ।
प्लाविता जगती तेन प्रलयाब्धौ निमज्जति ।।

स्फूर्जथुर्जृम्भते तूर्णं पृथ्वी थरथरायते ।
मघोनो वज्रनिर्घोषैर्विद्योतित इरम्मदे ।।

तारंस्वरेण तरसा तडित् तडतडायिता ।
दीर्घमाणा च घोषेण प्रचस्खालेव मेदिनी ।।

क्वचिद् गेहे सुखं सुप्तः स्वप्ने शुभ्रं स्मितं सृजन् ।
प्रकम्पितो हतस्वप्नश्चक्रन्दासौ स्तनन्धयः ।।

रुदन्तं तं समागत्य चुचुत्कारैरसान्त्वयत् ।
जननी तस्य सस्नेहं पुनरस्वापयच्च सा ।।

---

7. कुतपः गायक- वादकादिसमूहः लक्षणया तत्कर्म.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

5

आह्वयन्नुच्चरावेण धरित्रीं विरहाकुलः ।
वृषायमाण आकाश नर्दति स्पन्दते मुहुः ।।

शनैरवतरन्नेति मेघसोपानपङ्क्तिभिः ।
उच्छिलीन्ध्रे धरादेहे रोमाञ्चैरञ्चिते नभः ।।

वन्ध्या शोषितसर्वस्वा वार्धक्यं गमिता इव ।
खिलीकृता निदाघेन याऽचलेव धराऽखिला ।।

कायाकल्पमिवावाप्य श्यामा नववधूरिव ।
जाता पर्जन्यसंस्पृष्टा सरसा सा रसा रसैः ।।

आयाते प्रियपर्जन्ये कुसुमैः समलङ्कृता ।
नीलशाद्वलशाट्या च धरा वासकसज्जिका ।।

6

जलौघमग्नभूगोल - समुद्धारप्रयोजनात् ।
आलम्बयति पर्जन्यो धारारज्जूः समन्ततः ।।

प्रलयाब्धि - विलुप्ताया भूमेरन्वेषणाय सः ।
सूचीभेद्ये तमःस्तोमे धत्ते विद्युत्प्रदीपिकाम् ।।

मेघमेदुरसम्भेदपङ्कश्यानमसीकृतैः ।
भूतलं जातमाकाशमाकाशं भूतलायितम् ।।

प्रत्युद्गच्छति पर्जन्यमियमुल्लसतीव भूः ।
समुच्छलज्जलौघैस्तैरतिप्रहर्षविह्वला ।।

निरस्तरोदसीदेशं धराकाशौ समीपगौ ।
प्रावृण्मायामहाजालनिबद्धौ मिलितौ दृढम् ।।

7

अवतीर्णा इमा वर्षाश्छत्तीसगढजङ्गले ।
सहतेऽविरतं धारा - सम्पातं वृक्षसन्ततिः ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रुन्धन्त्येते द्रुमास्तूष्णीं पूगस्थूलांस्तु विप्रुषः ।
जनता सहते मूकं प्रहारानिव दुष्कृतान् ।।

वर्षाधारास्तथा बद्धा वागुरायां महावने ।
यथा भागीरथी वेगात् सङ्कुला शिवमस्तके ।।

क्षणमेव स्थिता मूर्ध्नि स्कन्धे प्रस्खलिता मुहुः ।
शाखासु स्यन्दमानाश्च पल्लवैरवरोधिताः ।।

शनैः शनैर्गता नीचैर्महावृक्षस्य मूलकम् ।
धरामिह निषिञ्चन्ति वर्षाप्रथमबिन्दवः ।।

8

रोमाञ्चितोऽभवद् विन्ध्य उद्गच्छत्पल्लवैर्द्रुमैः ।
कुर्वन् किलकिलारावं शाखामृगनिनादितम् ।।

छत्तीसगढभूम्यां च धान्यमारोप्यतेऽनिशम् ।
कलत्रैर्यत्र वा तत्र व्यस्तहस्तैर्निरन्तरम् ।।

अवाङ्मुखैः श्रमात् खिन्नैस्तथोत्तानीकृतत्रिकैः ।
जलौघमग्नकेदारे दारैर्वा पुरुषैः क्वचित् ।।

कलमानामिमा राज्य उत्खातप्रतिरोपिताः ।
निर्वाचने जनैः सद्यः शासनेऽधिकृता यथा ।।

बुभुक्षितस्य लोकस्य पोषणाय वसुन्धरा ।
विशालं पात्रमादाय धान्यपूर्णमुपस्थिता ।।

9

मनोरथा दरिद्राणां निदाघोत्थानपातिताः ।
धारासार - निपातेन क्षेमं तेऽपि समुत्थिताः ।।

छपच्छपत् प्रकुर्वन्त इमे धावन्ति बालकाः ।
नूनं कुतकुतं तेन क्षीरादेहे प्रजायते ।।

आग्रीष्मप्रखरे काले स्नाता ये न कदाप्यहो ।
खेलया स्नपयत्येतान् प्रावृण्नग्नान् हि डिम्भकान् ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गर्ताम्भस्यददुर्डिम्भा नौकां कागलनिर्मिताम् ।
प्रजातन्त्रोदधौ मुग्धैर्जनैर्दत्तं मतं यथा ।।

सीकरः सुखदश्चैष श्रमिकस्य तनौ पतन् ।
पुष्पासारैर्नभोगङ्गाजलार्द्रैः स्नपयत्यमुम् ।।

10

सद्यःसीरसमुत्कृष्टा सुरभिं भूरिशश्च भूः ।
लावण्यामृतसम्पृक्ता ललनेव विमुञ्चति ।।

कृष्टपच्या धरा सैषा फालकुद्दाललाङ्गलैः ।
रेखाङ्किताऽञ्चिता भाति भक्तिच्छेदैर्विभूषिता ।।

रोमाञ्चकण्टकैर्जुष्टा तुष्टा वन्या वसुन्धरा ।
लब्ध्वा पर्जन्यसंस्पर्शं समुच्छ्वसिति कोरकैः ।।

छिद्यमानवना नित्यं लुप्यमानतनुस्तथा ।
वृष्ट्या सृष्ट्या च कृष्ट्या च धरित्री किल जीवति ।।

उत्सारिते तथोच्छिन्ने पुनः कामं प्ररोहतः ।
वृक्षराजिर्वने सैषा जनस्यैषा जिजीविषा ।।

पूरोत्पीडेषु सरसां परीवाहा विनिर्गताः ।
अन्यायक्षुब्धमनसां मन्युनोदितभर्त्सनाः ।।

पटं मेघस्य संहृत्य रविः समयमीक्षते ।
कर्षकस्योन्नतिकरं सामन्तस्य कृतेऽन्तकम् ।।



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

4 धरित्रीदर्शनलहरी

प्रथम उन्मेषः

कश्चिद् यात्रापरिगतरुचिर्भारते पान्थ आसीद्
विश्वस्मिन् यो भ्रमणरसिको द्रष्टुमुत्को धरित्रीम् ।
प्राच्याधीतौ कलितरुचितो दिष्टयोगं नियोगं
लेभे गन्तुं प्रथितसुभगं प्राच्यशर्मण्यदेशम् ।। 1

दूराद देशाद् बहु नवविधं क्रीडनार्हं सुरम्यं
क्रीत्वाऽस्मभ्यं निजनिलयकं तात सद्यः समेयाः ।
इत्थं सोत्कः प्रणयनुदितो डिम्भकैरुत्सुकैः स्वै-
र्दारान् बाष्पाकुलितनयनान् सान्त्वयामास धीरः ।। 2

देशाद् गन्तुं बहिरपि तथा पारपत्रं स लेभे
दूतावासात् सपदि वृतवान् सुप्रवेशाधिकारम् ।
भार्या बालान् सुहृद इतरान् मंगलं भाषमाणा-
नापृच्छ्यासौ नियतदिवसे प्रस्थितः स्वीयगेहात् ।। 3

अन्ताराष्ट्रं तलमतुलितं देहलीस्थं यथार्हं
भव्यं भूमौ विपुलभवनं प्राप वैमानिकं सः ।
सद्यो दिव्यान् कुतुककलितो विस्मितस्तत्र दृष्ट्वा
भावांस्तांस्तान् लसितविभवान् व्यस्मरत् स्वानभावान् ।। 4

कृत्वा पूर्णं विहितविधिना तं च यात्रोपचारं
शालामन्तः प्रचुरविशदां स प्रविष्टो विशालाम् ।
आसीनोऽत्र स्थितमधितलं सम्मुखीनं विमानं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।। 5

आरूढश्च प्रमुदितमनाः प्रेर्यमाणं विमानं
स्थानं नीतः श्रमविगमकं यानबालाप्रदिष्टम् ।
यानाध्यक्षो गमनसमयं चाथ संघोष्य यातुन्
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।। 6

रिंगन् रिंगन् वलयपरिधौ भूमिभागे विमानः
स्थानात् तस्मादुपरि सहसैवोत्थितश्चान्तरिक्षे ।
क्रान्त्वा भूमिं प्रगुणितरयो भूय एवोन्मुखः खे
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः 7

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गत्वा चोर्ध्वं वियति विपुलेऽसौ विमानो ललम्बे
निःस्तब्धत्वं गत इव यथा विस्मृतश्वास आसीत्।
नो संसर्पन् नियतगमनः पृष्ठतश्चाग्रतो वा
विश्वामित्रप्रतिहतरयः सम्पतन् वा त्रिशंकुः।। 8

उड्डीनः किं वियति सहसा पक्षिराजो गरुत्मान्
पार्श्वाभ्यां सोऽतिविततततती पक्षती सम्प्रसार्य ।
भूगोले वा भ्रमति विपुले पुरुषश्चोर्ध्वमूर्ध्वं
वृत्वा भूमिं स्थित इव च तां सर्वतः क्रम्यमाणाम् ।। 9

नीचैरासीत् तरलसलिलं गाहमाना धरित्री
पान्थो धीरस्तिमितनयनस्तां गवाक्षादपश्यत् ।
तूर्णं चित्तं समभवदहो भाववैचित्र्यपूर्णं
तेनात्मानं मुदितमनसा स्वात्मनैवाबभाषे ।। 10

यस्यां गीतं हसितमनिशं क्रीडितं नृत्तमासीत्
यस्यां ते ते मुदितहृदया उत्सवा योजिताश्च ।
दूरे संस्था निकटमिह सा भासते भास्वतीव
स्वेष्टस्येवच्छविरुपनता साक्षिभास्यस्वरूपा ।। ।।

द्वितीय उन्मेषः

शुभ्रा स्वच्छा हिमकणततिर्दृश्यते या विमानात्
कीर्णा नीचैरुपरि परितश्छाद्यमाना समन्तात् ।
पश्याम्येनां रजतसदृशीं राजमानां मनोज्ञां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे धरित्र्याः ।। ।

यद्वा दृष्टं वियति मनुजैर्वस्तु यद् विप्रकृष्टं
नीचैः संस्थं न खलु विततं वर्तते तादृशं तत् ।
नानारूपैः प्रकटयति नः सान्यथाकृत्य सृष्टिं
स्वोन्मेषस्तैः कविकुलगुरोस्तस्य चैकस्य दृष्टिः।। 2

एषा शेते ह्यलसलुलिता क्लिन्नगात्रीव शीते
प्रच्छाद्य स्वां शिथिलिततनुं तूललेशैर्धरित्री ।
जाड्याधिक्यादतिहिमजडा ग्लप्यमानातिदीना
जाता मन्ये शिशिरमथिता पद्मिनी वान्यरूपा ।। 3

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

निर्वाते किं वियति विपुले विश्वनीडो ललम्बे
निःस्पन्दत्वं कथमिह गतश्चायमोको जनानाम् ।
पश्याम्येनां निभृतनिभृता म्लानगात्रीं धरित्रीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्।। 4

शब्दाख्येयं यदपि किल तद् वस्तुजातं समग्रे
लोके, लोक्यं विविधकलया रोचनैर्लोचनैर्वा ।
आयत्तं तत् कथमिह भवेन्नूतनैः स्वीयशब्दै-
र्मन्दाक्रान्ता कविकुलगरोः सज्जत यत्तु चित्ते।। 5

स्यूतं स्यूतं पुनरपि च यच्छीर्यते धार्यमाणं
गात्रे क्लृप्तं कथमपि तथाऽऽच्छादने नालमेव ।
धृत्वा देह हिममयमिदं श्वेतकार्पासवस्त्रं
पृथ्वी चास्ते विकलकरणा निर्धना गेहिनीव ।। 6

चक्रः किं वा भ्रमति विततः कालकौलालनुन्नो
न्यस्तः पिण्डा लघुरिव मृदः पर्वता भाति मध्ये।
दृष्टा . पृथ्वी भ्रमितविधुराऽलातचक्रप्रभैषा
सिन्धुर्बिन्दुर्भवति वितता दीर्घिका चाप्यदीर्घा ।। 7

अन्तं यातः शिशिरसमयो नो हिमानी व्यपेता
आर्त्ता जाता धरणिरिह किं कालवैकल्यभावात्।
सैवानन्या सहजसुलभा विद्यतेऽस्यास्तितिक्षा
सोऽपि स्नेहः शिशुजनगतः सैव चास्याः प्रतीक्षा।। 8

औदार्यं तद् विकटपृथुला रम्यता सैव तद्वत्
सैवैषाऽऽस्ते धृतिगतिमती मातृरूपा धरित्री ।
पश्यन्नेतां परित इव तां देवतां मन्दिरस्थां
ध्यायं ध्यायं मुदमनुपमां व्योमपान्थो जगाम ।। 9
सर्वं देव्या अतुलितकथं वन्द्यहृद्यस्वरूपं
साक्षाद् दृष्ट्वा चकितमनसा चिन्तयामास पान्थः।
किं नोऽजानां प्रतिशिशुजनं प्रेम विश्वम्भराया
अस्या अङ्के मृदुलपृथुले यापयेन् दीर्घकालम् ।। 10

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बीजं प्रेम्णो निहितमभवद् यद्धि चित्तेऽप्ररूढं
शुष्के क्षेत्रे सलिलपतनोद्भिन्नमासीत् तदानीम् ।
चित्ते स्वीये विगलनकरी भावना तेन तेने
स्वेष्टे वस्तुन्युपचितरसा प्रेमराशीभवन्ती ।। ।।

तृतीय उन्मेषः

आयातैषा ह्यविदितगतिर्यामिनी रुद्धयामा
नो वा तारा इह विकसिताश्चन्द्रमा नैव दृष्टः।
अन्तर्धानं नभसि तु गते कज्जलैः कीर्यमाणे
ध्वान्तव्यूहं प्रविशति शनैर्दृष्टिहीनो विमानः ।। ।

दर्शं दर्शं परित इव तान् व्योम-यातॄन् विमाने
नाना-भाषाप्रकृतिसहितान् साम्यवेषम्ययुक्तान् ।
स्वात्मान, तन्नियतिनटनं मानवेच्छापरीतं
लोकं पश्यन्, कुतुककलया कीलितोऽभूत स पान्थः ।। 2

अग्रे संस्थो नर इह मनाक् कूणितस्कन्धदेशः
पेयं गृह्णंश्चषकलुलितं व्योमबालाग्रहस्तात् ।
स्वादुंकारं कटुरससुरां 'स्काच'-नाम्नीं तथान्यां
शैम्पेनाख्यां मधुरमदिरां मोदते स्वप्नमूढः ।। 3

स्वप्ने पश्यन् भ्रमिषु वलितं श्रोणियुग्मं स्वकीर्त्ते-
स्तृप्तो दृप्तो विनयविरहात् स्वाधिकारप्रमत्तः।
कर्त्ता धाता निखिलजगतश्चैक एवास्मि धीमा-
नित्थं चेतः स्मयमदमयं सैष मूढः करोति ।। 4

पृष्ठे संस्थो जन इह तथा मेदुरश्यामवर्णः
केशाग्रैः स्वैः परमकुटिलो नो मनाङ् मानसेऽसौ ।
'नामीबीयां' पर-कर-धृतां धर्षितां राष्ट्रलक्ष्मीं
ध्यायन् स्वीयां, व्यपगतरतिर्विक्लवत्वं प्रयाति ।। 5

कस्मिन् देशे सकलविभवे लब्धजन्माऽसि भद्र ।
पृष्टश्चेत्थं निगदति यदा देशनाम त्वरार्त्तः ।
वाष्पस्तब्धः कलुषनयनो जोषमास्थाय तोषं
स्तोकं चैवं प्रणयविधुरो नाश्नुते पारतन्त्र्यात् ।। 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्नायुष्वस्य प्रवहति परं शोणितं शोणमारा-
दस्याप्येतद् हृदयमनिशं विद्यते स्पन्दमानम् ।
भाले ऽस्यैया लिपिरिह तु या ऽलेखि धात्रा प्रशस्ते
धिक्कृत्यैनां प्रभवति तथोद्धर्तुमात्मानमेषः ।। 7

कालज्वालामुखमुखरिता ये व्रणाङ्कास्त्वदीया
हृन्मर्मान्तस्तरलहृदये सादयन्तः सदा त्वाम् ।
स्फोटस्तेषां भवति नु कदा भूतधात्रि त्वदीयं
यो वै तापं शमयति गिलन् किल्विषं भारभूतम्।। 8

यद्वा सर्वं सहस इति ते नाम सर्वंसहेति
पापाचाराः कति कतिविधाः किं भवत्या न सोढाः ।
क्षान्तिः क्ष्मे ते क्षणमपि मनाक् प्राप्नुते नैव लोपं
माता वा स्यात् कुतनयजनैः किं कदाचित् कुमाता ?9

स्वार्थान्धैस्तैः क्षपितकरुणैर्नीयमानाभ्रगंर्त्तं
कैश्चित् सद्भिर्ध्रियत इह वा धार्यमाणा धरैषा ।
इत्थं चिन्तातिभिरधिकं घूर्णमानस्य तस्य
स्थित्वा यानेऽनिमिषमनिशं रात्रिरेव व्यरंसीत् ।। 10

सायंकाले स्वयमुपगतं गूढमङ्के धराया
आश्लिष्यैनां क्वचिदपि निशामाशयानं प्रगल्भम् ।
प्राचीतीरे दिनमणिमसौ रश्मिभिः सन्निबद्धं
काष्ठाभिस्तं घटमिव शनैः कृष्यमाणं ददर्श ।। ।।

चतुर्थ उन्मेषः

संसर्पन्ती सलिलतरला शुभ्रवर्णाभ्रमाला
सीम्नो रेखां विरचितवती स्वर्भुवोर्मध्यदेशे ।
सूर्यालोके गगनसरणौ स्यन्दमाने विमाने
तस्याधस्तात् सपदि वसुधां तूलकल्पा न्यरुन्ध ।। ।

आस्तीर्णैषा परिवहपथे मेघमालावदाता
सञ्छाद्यैनां धरणिमिह किं पाण्डुशुभ्रैर्दुकूलैः ।
उड्डीयन्ते पवनचपलाः किन्नु पट्टांशुकानां
श्वेतस्निग्धा दिशि दिशि सृतास्तोरणालोलमालाः।। 2

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पारावार: स्वयमुपगत: प्लावयित्वा द्युलोकं
दूरे क्वास्ते त्रुटितपुलिना लीयमाना धरित्री ।
मेघालीं तां प्रविशति शनै: पारयिष्णुर्विमानो
गामुन्नेतुं विशति वदनं किं वराहस्य विष्णो ।। 3

किं सञ्जात: सघनतिमिरे पूर्णिमाया: प्रकाश:
स्फीतं किं वा प्रवहति तथा दुग्धकुल्यासहस्रम् ।
नीचैरेषा धवलधवला लक्ष्यते मेघमाला
राशीभूत: प्रसृत इव किं त्र्यम्बकस्याट्टहास: ।। 4

किं क्षीराब्धेरुपरि च शनै: स्यन्दमानेव नौका
राशेराहो ह्युपरि यशसां धूयमाना पताका
मेघानां स क्षितिजपुलिनादास्तृतानां विमानो
मध्ये गच्छन् रवविरहितो लक्ष्यते कृष्यमाण: ।। 5

आकाश: किं पवनशकलैर्मथ्यते दिग्वधूभि-
र्मेघा नैते दधिमथनत: कृष्टगव्यं सुनव्यम् ।
क्षीराब्धेर्वा मथनसमये फेनपुञ्ज: समुत्था
द्यावाभूम्यो: प्रसरति बहु क्षिप्यमाण: समन्तात् ।। 6

बाल: कूर्दन्नटति मुदिरप्राङ्गणे वारणास्य-
स्तिष्ठत्यग्रे क्वचिदिह च वा मेघपङ्क्तौ विडौजा: ।
लीन: क्रूरोऽतिसघनघनाडम्बरे शम्बर: किं
चेतस्यासीदिति सुविततं मेघमालोक्य तस्य ।। 7

पत्राण्येतान्यमितविततान्यालये ब्रह्मणो वा
नित्यं येषामुपरि कविता किं पुराण: कवि: स ।
या नो जीर्येल्लिखति नवलामक्षतां दिव्यवाचा
पत्रे पत्रे कनकखचितं तद्धि देवस्य काव्यम् ।। 8

अभ्रं छिन्नं क्षणमहि पुनर्भूतधात्री तथाऽसा-
वालोके मे निपतति शनैर्निम्नगेव स्खलन्ती ।
यद् वा भूमि: सिचयपटलं सन्निरस्य क्षणं सा
भृंगप्रायं प्रहसितवती वीक्षमाणा विमानम् ।। 9

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

छिन्नादभ्रात् किमिह खलु तद् दृश्यते गर्त्तरूपं
गर्त्तो नासौ तरलसलिलं सागरस्यैव नूनम् ।
नीले तस्मिंस्तरति सलिले मत्स्यरूपं नु किञ्चि-
न्नौका नूनं भवति ननु सा मन्थरं स्यन्दमाना ।।10

नीचैरेषा प्रगुणितगतिर्याति नौका विशाला
याति स्वैरं नभसि वितते चोर्ध्वमस्मद्विमानः ।
मन्ये चाब्धेः पयसि वसुधाचेतसीव प्रसन्ने
छायात्मास्य प्रकृतिसुभगो विन्दते द्राक् प्रवेशम् ।। ।।

पञ्चम उन्मेषः

साक्षात्कृत्य प्रणयमुदितो भूतधात्र्या दविष्ठं
वैभ्राजं तद् विततमखिलं दृश्यमालेख्यकल्पम् ।
नीत्वा बिम्बं हृदयपरिधिं प्रत्यभिज्ञाप्रतीतं
संसारं तन्निहितमखिलं विश्वरूपे ददर्श ।। ।

'एते प्राप्ता ननु वसुमतीं सावधाना भवन्तः
सन्तिष्ठेरन्, भवतु भवतां मंगला चैव यात्रा' ।
यानाध्यक्षो मुदितमनसा घोषयामास चेत्थं
प्रह्वीकुर्वन् सपदि वसुधां नीयमानं विमानम् ।। 2

सूर्येणाभाकलितमधुरं रश्मिभी रञ्जिताया
नीचैर्यास्यन्नमितवदनो मेघसोपानपङ्क्तेः ।
आविद्धोऽसौ भवति सघनैरभ्रखण्डैरदभ्रं
भूमीदेव्या हृदयकरुणासान्द्रनिःश्वासकल्पैः ।। 3

आविर्भूते शशिनि तमसा शर्वरीव व्यपेता
नैशस्यार्चिर्हुतभुज इवापेतधूमाग्रपुञ्जा ।
दूराद् दृष्टा निकटनिकटं भूतधात्री समेता
धेनुः प्राप्ता व्रजमिव यथा वत्समाकारयन्ती ।।

पृथ्वीपत्रे निपतितमसेर्बिन्दुरेको य आसीत्
सञ्जातोऽसौ सघनवितता वृक्षपङ्क्तिर्वनान्याः ।
भूम्या हस्ते चुलुकविधृतं यज्जलं दृश्यते स्म ;
पश्चाद् दृष्टः सृत इव पटः, सागरस्तद् बभूव ।। 5

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आयाता सा जलधिरशना भूतधात्री समीपं
माता स्नेहप्रचितहृदया चार्बुदानां जनानाम् ।
अक्षय्यान्तर्हितनिधिततिस्तप्तहेमप्रभाभ्यां
वक्षोजाभ्यां सुमधुरपयः पाययन्ती तनूजान् ।। 6

भास्वद्भानोः प्रविततनभोमण्डलैस्तैः कराग्रै-
रामृष्टैव प्रतिदिनमसौ बुध्यते त्यक्तनिद्रा ।
अद्याप्येषा भ्रमति भवने भूर्भवन्ती सुभव्या
नूत्नैवास्ते पुनरपि पुनर्जायमाना पुराणी ।। 7

एषा शुभ्रां तनुमिह शुभां संविदाना विभाता
स्नाता चोर्ध्वं सरसि रमणी दृष्टये ज्योतिषाऽऽगात् ।
मुञ्चत्यस्या अलकनिचयश्चूर्णितां बिन्दुधारां
शष्पश्यामाच्छिखर-निकरात् स्यन्दमानैः प्रपातैः ।। 8

धम्मिल्लं स्वं घनवनगतं सस्मितं धुन्वती सा
स्कन्धे धृत्वा हरितहरितं शाद्वलानां दुकुलम् ।
प्रातःकाले जलधिजपयश्चुल्लुके स्वे प्रगृह्य
माताऽऽयाता तनयवदनक्षालनार्थं समीपम् ।। 9

यस्यां पूर्वे प्रथितयशसश्चक्रिरे विक्रमांस्ता-
नर्वाचीना विदधति कलाकौशलं ज्ञानसत्रम् ।
सा नः क्षेमं वितरतु धराऽऽराधिता रत्नगर्भा
माता भूमिर्विनततनयः सोऽस्मि चास्या धरित्र्याः ।। 10

इत्थं भूमिं स्वहृदयतले भावयत्येव तस्मिन्
यानं गत्वा धरणिमभितस्तां परिक्रम्य तस्थौ ।
प्रह्वो हृष्टो मनसि बहुशस्तां सुमूर्तिं विचिन्वन्
धीराश्वासः शिरसि पथिको धूलिमस्या दधार ।। 11

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

5 जनतालहरी

पायाद् वः श्रमिकस्य भालनिचितं घर्माम्भसां जालकं
प्रोञ्छन्तीव रसात् प्रसारितकरा कारुण्यनिःष्यन्दिनी।
क्षेत्रे कार्यरतांश्च पामरजनानाह्लादयन्ती शुभा
छाया साऽऽतपदुस्सहेऽत्र दिवसे कृष्णाम्बुदस्यायता ।।1

केचिद् भक्तिपरायणा भवभयादर्चन्ति देवान् स्तवैः।
केचिच्चाटुरताः खलांश्चलधियो नेतॄन् प्रभूञ्छ्रीमतः ।
अस्माकं तु निसर्गतः स्थितिलयाविर्भावहेतुः परं
योगक्षेमविधायिनीह जनता राष्ट्रस्य सा स्तूयते ।। 2

नो न्याये रमतेऽक्षपादचरिते मे शेमुषी, सर्वतो-
भावाच्छ्लिष्यति नो कणादकथितं वैशेषिकं दर्शनम् ।
मीमांसामपि कर्मकांडजटिलां मीमांसते नो तथा
निर्वाणं किमु मर्षयेद्धतगुणं शून्यस्य दूरे कथा ।। 3

शास्त्रस्याध्ययनं वृथाऽधिकतरं धर्मस्य चर्चा वृथा
वैफल्यं तु गता कथापि सकला पौराणिकी शाश्वती ।
नो ध्याता जनता जनस्य हृदये नारायणः संस्थितो
नो ज्ञातो, यदि नो कृतोऽस्ति जनतोद्बोधाय यत्नो न वा ।। 4

नो दानैर्न तपोभिरप्यतितरां नो चेज्यया विद्यया
नो काषायपटैरखण्डविभवैः स्यात् संस्कृतो मानवः ।
हित्वा स्वार्थपरायणैकधिषणां धृत्वा च सेवाव्रतं
लोकाराधननिष्ठयैव पुरुषः संस्कार्यते धार्यते ।। 5

वेदान्तेषु यमाहुरेकपुरुषं तत्प्राप्तिलाभेन किं
ब्रह्मानन्दरसेऽपि किं ह्यधिगते संसारविच्छेदजे ।
वैषम्याहितभीतिसङ्कुलमिदं चालोक्य लोकं मनो
नो कारुण्यसमाकुलं यदि न वा जातं व्यथान्दोलितम् ।। 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एकं सद् बहुधा वदन्ति यदिदं विप्राः परं पारगं
यच्चैतन्यमखण्डमेकमखिलं ब्रह्माण्डभाण्डे स्थितम् ।
तन्नानात्वविभक्तमप्रतिहतं संज्ञैरसंख्यैः शिवै
रूपै रूपितसर्वनाम्नि जनताचिद्धाम्नि लीलायते ।। 7

या संघर्षरता विमर्शसहितं या मर्षयन्ती स्थिता
प्रत्युप्तान् हृदि वेदनाव्रणकरान् बाणान् विषैः सम्प्लुतान् ।
नित्यं हालहलं निपीय जनता या नीलकण्ठायते
वन्द्या साऽद्भुतसंगरैर्निपुणा संसारभूमौ दृढा ।। 8

या विश्रम्य पुनः श्रमे श्रमजलक्लिन्नापि संसज्जते
श्वासाध्मातशरीरनिस्सहतया दीना मुहुर्मूर्च्छति ।
यातायातसहस्रकोटिगमितैर्यान्ती च नो याप्यते
या संकल्पविकल्पसंशयशतै रुग्णापि सुस्थायते ।। 9

नानावेषविशारदापि नियतं चैकेव या शारदा
भाषाभिर्व्यवहारमेति बहुधा भिन्नाप्यभिन्नायते ।
यस्यां संश्रितमेतदभ्रनिचितं विश्वं कुटुम्बायते
या ब्रह्माण्डवटस्थनीडनिलये स्थित्वा शकुन्तायते ।। 10

कश्चित् स्तौति विशेषणैर्बहुपदै नेतृब्रुवं वाञ्छलै-
र्योदिङ्नाग इवावलेपयति च स्थूलं स्वहस्तं तथा ।
सर्वत्र प्रथते प्रभावगुरुभिः सम्पर्ककर्मान्यवै-
र्वागाडम्बरविभ्रमैकनिपुणो जातः कवी राष्ट्रियः ।। 11

नाहं स्तौमि वयामि नैव मसृणं चीनांशुकं स्वैः पदैः
शब्दैर्नो रचयामि कृत्रिमसुमैश्चित्रां विचित्रां स्रजम् ।
एषा सा सहजं विभावितगुणा मे मानसे संस्थिता
व्यक्तिं स्वस्य करोति चैव जनता वाग्भिर्ममैषा ध्रुवम् ।। 12

एकोऽहंखलु चास्मि बुद्बुदनिभो यस्मिन् जनिं प्राप्तवान्
निस्सीमे गहनेऽप्रमेयजनतापाथोनिधौ भङ्गुरः ।
शीर्ये वा स्फुटितो भवेयमिह वा लीये ततोऽत्रैव च
स्थास्येऽत्रैव तथापि यस्य कुहरेऽनन्तस्य वार्धिनिधेः ।। 13

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

छाया मामनुधावतीह सततं ध्वान्ते प्रकाशेऽथवा
या जागर्ति विजृम्भते मम सदा स्वप्नेषु सुप्तेषु वा ।
रम्ये दृष्टिमुपागते प्रकुरुते पर्युत्सुकं या मनो
गीते काव्यविधौ निरन्तरमितो या स्पन्दते स्यन्दते ।। ।4

छायायां निमिषत्यजस्रतरला यस्यां स्मृतीनां ततिः
यस्यां ता गमिताः कला विगलिता काष्ठा मुहूर्तास्तथा ।
यस्यां नूतननूतनः प्रतिपलं मृत्वा पुनर्जीवितः
सीमानः स्वकृता विघाट्य विपुलाभोगा मयोद्घाटिताः ।। ।5

आलोके निपतत्यतन्द्रतरुणे लोकप्रभाभास्वरे
सा च्छाया मयि जायते वितनुते चारुह्य रूपायते ।
यस्यां संगतिमाप्य रूपबहुला रम्याः समुल्लासिता
स्वप्नास्ते जनताधृता धृतबला भावाः समूहोद्भवाः ।। ।6

एकाकी विचरामि यामि जनता संघट्टसङ्घेऽथवा
स्वैकान्ते ह्यथवा भवाम्युत पुनः कान्तासहायो मुदा ।
सर्वत्रैव समाजदत्तविभवैर्भावैरभावेष्वपि
जीवाम्येष तथैव जीवनरसं सङ्ग्रह्य सत्त्वं तथा ।। ।7

यत्काव्यं कवयामि भावितरसं शब्दार्थविच्छित्तिजं
यद्गीतं स्फुटमांसलं लययुतं गायामि लीलान्वितम् ।
यत् स्फूर्तं विदुषां सभासु विपुलं व्याख्यानसम्भाषणं
तत् सर्वं जनताजनार्दनमहादेवस्य संकल्पजम् ।। ।8

औदात्यं श्रमलग्नभग्नविभवेष्वेव श्रितं सर्वथा
धैर्यं तदधि यदन्नवस्त्ररहितैर्निस्साधनैर्धार्यते ।
निम्ने यो नवसाम्योगनिरतः सम्प्राप्य वर्गे जनिं
धीरोदात्त इति प्रथां हि नियतं नव्ये युगे सोऽर्हति ।। ।9

क्षेत्रे स्वे श्रमबिन्दुचित्रिततनुर्यो वै तपस्तप्यते
तं निर्वास्य दुराग्रहात् स्ववसतेराच्छिद्य भूमिं ततः ।
आक्रम्यातिमदादगण्यमिव तं मत्वा जनं निर्भया
विक्रामन्ति च साट्टहासमधुना चञ्चा मनुष्या सुखम् ।। 20

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाञ्चाल्या इव कृष्यते हतधिया दुःशासनेनानिशं
यस्या वस्त्रमपीह चैव वदनाद् ग्रासस्तथाऽऽच्छिद्यते ।
आमूलं छलिताऽशुभैर्नृपशुभिः कौटिल्यनीत्या च या
सैवेयं जनता हता विदलिता कष्टां दशां प्रापिता ।।21

वसनं परिधूसरं वसाना नितरां क्षाममुखी हृतस्वरूपा ।
अतिनिष्करुणेन केन नीता जनतैषा कठिनां दशां विषण्णा ।। 22

को जानीते हृदयं को वैतस्याः कथां व्यथां शृणोति ।
कुररीवत् कान्तारे जनता करुणं कथं विरौति ? ।।23

सेयमवगुण्ठनवती निर्दलिताखिलशरीरलावण्या ।
अत्याचारैः खिन्ना पतिगृहगमिता वधूरिवास्ति ।। 24

गच्छति पुरतो देशः पुनरिह पश्चात् प्रधृष्यते जनता ।
कोऽयं समाजवादः प्रगतिर्वा कीदृशी सेयम् ।। 25

एकत्राभ्रविचुम्बिभिः प्रसृमरैः सौधैः समुत्सार्यते
दुर्नीतिप्रचितैः परत्र विधमद्दावाग्निभिर्दह्यते ।
अन्यत्र प्रतिगामिभूमिपतिभिः कुद्दालकैश्छिद्यते
दूर्वेव प्रतिरोहतीह जनता विन्ध्याद्रिभूमौ तता ।। 26

वत्सत्वेऽतिबुभुक्षितां स्वजननीं दूरस्थितामीक्षते
याऽऽपीनं विनिपीड्य दोहनपरैर्दोह्यते यौवने, ।
वार्धक्ये बहुखेदिता च वधिकैः सूनागृहं नीयते
सैषा गौरिव भारतीयजनता व्याहन्यते निर्दयम् ।। 27

गृष्टिर्ग्लायति सीदति स्तनभरैर्वत्साय चोत्कायते
गोधेनुः प्रविताड्यते गतघृणं हम्बारवोद्गारिणी ।
दीना यातु च कुत्र लुप्तविभवा शुष्कस्तनी गोवशा
सा गोबष्कयणी व्रणीकृततनुर्गेहात् समुत्सार्यते ।। 28

एके धूसरधर्मकञ्चुकवृता आच्छन्नकूपोपमा
अन्ये शास्त्रमुदाहरन्ति च सतीदाहप्रचाराय ये ।
येऽमी मानुषराक्षसाः स्वयमहो नारीं दहन्त्यत्र वा
नैतेषां परमार्थतोऽपि भवति स्वल्पं किमप्यन्तरम् ।।29

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दग्धासीत् खलु दक्षयज्ञदहनज्वालासु पूर्वं सती
दाहं नैव समर्थयञ् ज्वलितदृक् क्रुद्धो यथा धूर्जटिः।
अन्यायं प्रतिकर्तुमेव भगवान् दक्षक्रतुं नाशयन्-
नुग्रं ताण्डवमाचरन्नजनयच्छ्रीवीरभद्रं गणम् ।। 30

ये केचित् खलु धारयन्ति वितथां धर्मस्य कन्थां वृथा
मिथ्याचारपरायणा च बहुधा प्राहुर्वचो पुष्पितम् ।
सर्वांस्तान् कुपथाश्रितान् हतधियो दुर्दाम्भिकाञ् छासितुं
दुर्वृत्तस्य विनाशनाय जनता कुर्यात् तथा ताण्डवम् ।। 31

आदायाहितसारमाहितरसं सन्ताड्य मुष्ट्या मुहुः
संसारस्य शिलातलेऽतिगुरुके चोत्तोल्य सम्पातयन् ।
जीर्णं वस्त्रमिवातिनिर्दयतया निष्पीड्य विस्तारितं
कालो धावकवद् दरिद्रमनुजं मृद्नाति सङ्क्षालयन् ।।32

ग्रीष्मेऽङ्गारखरैस्तपन्निह करैर्मित्रोऽप्यमित्रायते
वर्षन् भग्नकुटीरजर्जरवृतौ देवस्तु दैत्यायते ।
क्षुत्क्षामस्य विषायते मधुरहो नो माधवस्त्रायते
सामन्तैर्बहुखेदितस्य निखिलं विश्वं विरुद्धायते ।। 33

अन्योन्यं क्षपयन्ति दुष्टमतयो निघ्नन्ति राष्ट्रं जनं
नेतारश्च परस्परं प्रतिगताः पक्षं विपक्षं श्रिताः ।
व्यूहं वा रचयन्ति द्वन्द्वनिरता राज्यश्रियः काम्यया
ते स्वं घ्नन्ति परं नयन्ति निधनं सुन्दोपसुन्दौ यथा।। 34

आत्मानं तु निषेवते स जनतासेवाव्रतं धारय-
न्नुच्चैः प्राप्य पदं च पश्यति जनं न्यक्कारगर्भं भृशम्।
शुभ्रः खद्दरवस्त्रमण्डिततनुस्तृष्णां तु नो मुञ्चति
काषायं न जहाति चेतसि धृतं काषायकन्थो यथा ।।35

नेताऽसौ नवयौवनो नवमदो नव्योदयो नव्यधी-
र्योज्ञानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनम् ।
उच्चैःकारमपि ब्रवीति बहुलं सन्त्यक्तलज्जो जडः
कालस्यैष गतिं न वेत्ति महतीं रीतिं च संस्कारिताम् ।। 36

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कारै रहिता प्रशासनरता मत्तास्तु ते पूरुषा
आनर्थक्यमहो प्रयान्ति विकलाः शब्दा यथाऽसंस्कृताः।
आशेव प्रहताऽपवादकलुषा कीर्तिः, कृशा श्रीर्यथा
राष्ट्रे स्वे जनताऽवमानविधुताऽधीतिर्यथा सीदति ।। 37

एकश्चूषति लोकशोणितमहो दुर्दाम्भिक्को धार्मिको
धर्माडम्बरदिग्भ्रमैकनिपुणश्चान्यः पटुर्मौलवी ।
एतौ द्वावपि वञ्चनाहितमती धिक्कारपात्रं, परं
शोच्या तावनुगच्छतो जडधियो गड्डारिकावज्जनाः।।38

ग्राहं ग्राहमियं कचेषु मुषिता मेषस्य मातेव या
क्रव्याद्भिः प्रविलुप्यमानवदनाद् गौर्गौरिति व्याहृता ।
साहं साहमतीव दुःखनिचयं चाविर्भवत्तेजसा
कालं प्राप्य करोति सैव जनता शार्दूलविक्रीडितम् ।।39

विन्ध्याद्रिं समतीत्य दक्षिणभुवं श्रीकुम्भयोनिर्मुनि-
यातस्तं प्रतिपालयन्निह गिरिर्नम्रो नतः संस्थितः ।
दिल्लीं यात इतश्च स प्रतिनिधिर्निर्वाचितो यो जनै-
ग्रमि जानपदाः प्रतीक्षणपरास्तिष्ठन्ति धैर्यान्विताः ।।40

उत्सिक्ता विनयाच्च्युता नृपशवो भाग्यैश्चलैर्विस्मिताः
क्रूराचारपरायणाश्च धरणीं नेतृब्रुवाः शासति ।
नीचैस्तैर्न धृता धरा च नितरां नीचैरियं नीयते
तामेतां तु समुद्धरेद्धि जनता स्वेनैव सत्वेन सा ।। 41।

आयातेऽवसरेऽनुशासति च या दुःशासनान् दारुणान्
शक्तिः सा जनतागताऽतिमहतीदानीं तथाऽऽविर्भवित् ।
साम्यालोचनलोचनेन निखिलैर्लोकैरिदं लोकितं
स्वाराज्यं च जनेषु दत्तविभवं तद् भारते भ्राजताम् ।। 42

सक्ता खादतमोदतासु नितरां हर्म्येषु भव्येषु ये
स्वादुङ्कारमपीह षड्रसमयं भोज्यं तथा भुञ्जते ।
आयाहीत इतश्च याहि वद रे मौनं भजेथा अरे
चेत्येवं खलु ये निरन्तरमिह क्रीडन्ति प्राणैर्नृणाम्।।43

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ऐश्वर्येऽपि तमोरतास्तृणलवप्राया समस्ता इमे
मन्यन्ते च तृणाय ये स्मयजुषः साधारणं मानवम् ।
वात्येवातिदुरन्तवेगभरिता सङ्घात् समुत्पादिता
नाशं नेष्यति तान् लघूनिव लवान् शक्तिर्जनानां द्रुतम् ।। 44

ये भूमिं निखनन्ति खर्वपरुषां कुद्दालमुत्तोल्य, ये
साम्बाकृत्य कृषन्ति शस्यजननीं, कर्षन्ति ये वा हलम् ।
ये स्कन्धेषु च रोपयन्ति विपुलं फालं तथा लाङ्गलं
धाराभिः परशोरुदग्रपरुषाश्छिन्दन्ति काष्ठानि ये।।45

ये लौहं द्रवयन्ति यन्त्रनिवहैः सीव्यन्ति वस्त्राणि ये
दर्वीर्वा त्वरितं नुदन्ति विपुलाभोगे कटाहे च ये ।
उन्मातुं पृथिवीं दिशो विमथितुं संस्प्रष्टुमाहो नभः
सन्त्येते किणचिह्निता व्रणयुतास्ते ते करा उत्थिताः।। 46

वृष्ट्यापूरजलौघमग्नपुलिने वृन्दावने यामुने
कृष्णः कालियमर्दनोऽप्यभयदो गोवर्धनं धारयन् ।
इन्द्रस्याप्यतिगर्वबर्बरहृदो मानं च सञ्चूर्णयन्
गोपालैः सहितो हितस्वजनताजीवातुभूतोऽभवत् ।। 47

तद्वत् कालियकर्मघोरनिपुणान् दुर्वारदुःखप्रदान्
दुर्नेतॄन् जनतापि मर्दयतु तान् देशान्वये संहता
एकच्छत्रमिव प्रसारितमयं राष्ट्रस्य गोवर्धनो
लोकालोक इवाचलो वितनुतामालोकमाराच्छुभम् ।। 48

आद्यावापृथिवि स्थितां करतलैः सन्ताडनीयामिमां
सम्भूयैव भिनत्ति रश्मिनिवहो भानोस्तमिस्रातितिम् ।
छिन्द्यादुद्यदुदग्रदुष्कृतिमयं तद्‌जनानां गणो
ध्वान्तं लोकपथावतीर्णमखिलं नेत्रोत्सव लोकितः।। 49

होतारो वयमृत्विजस्तु जनतागशक्तेर्महासङ्गमः
सुप्रातः सुदिवाः सुसन्धिसमयः सुश्वा जनो जायताम्।
यज्ञेऽस्मिन् प्रविभज्यतां प्रतिजनं निर्वाचने शासनं
ह्यालोकः प्रसरीसरीतु सुभगश्चा लोकतन्त्राध्वनः ।।50

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

6. रोटिकालहरी

रोटिका देवता दुःखदैन्यापहा
शुभ्रकान्त्यान्विताऽखण्डवृत्तान्विता ।
एतु मे मन्दिरं सम्यगासेविता
चक्रवच्चालितेवान्नपूर्णारथैः ।। ।

क्लिन्नगोधूमचूर्णस्य पिण्डैः समं
वेल्लिता चक्रपट्टे च विस्तारिता ।
ऊष्मणा योजिता वाष्पपूरान्विता
वाष्पपूरं हरन्ती शिशोर्नेत्रजम् ।। 2

क्षेपिता चुल्लके फुल्लिता तत्क्षणं
मोदयन्ती जनानां सदा सा गणम् ।
त्रोटिता ग्रासकैर्दीयमानाऽऽनने
प्लावयन्ती च जिह्वामपूर्वं रसैः ।। 3

फुल्लिता शंखशुभ्रा यदा ध्मापिता
श्वेतपाण्डुच्छवी राजते रोटिका।
कीर्तिरेखाभिरेषा स्वयं निर्मिता
मानवीयश्रमश्लाघ्यमूर्तिर्यथा ।। 4

रोटिका राजते पूर्णमुक्ताकृतिः
स्वादिता चापि नित्यं नवास्वादिता ।
मानवानामखण्डस्य पुण्यस्य सा
केवलं त्वेकमस्ति प्रकृष्टं फलम् ।। 5

रम्यरामाननेऽकृत्रिमा राजते
भ्राजमाना कपोले तिलस्य च्छविः ।
भक्तिरेखा सुरम्या हनौ वा यथा
बभ्रवो बिन्दवो रोटिकायां तथा ।। 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भक्ष्यभोज्यान्विते चर्व्यचोष्यान्विते
पाकशालास्थले सा नभोरूपके ।
भ्राजते चन्द्रवद् भाजनान्तः स्थिता
व्यञ्जनैस्तारकैर्वा समन्ताद् वृता ।। 7

जाठरं दीपितं तापमाशु स्वयं
शान्तिमानीय तं मध्यवेदि स्थितम् ।
तर्पयन्ती मुदा सा हविर्भिः स्वयं
साधु वैश्वानरं वै नरे वानरे ।। 8

सा महाश्वेतया मण्डिता चाभया
पुण्डरीकेण वा संगता राजते ।
तत्परीणामभूतं समस्तं जगत्
सा च सृष्टेर्महाशक्तिराद्या स्थिता ।। 9

व्यञ्जनानां समस्तोऽपि राशिर्वृथा
शाकसम्भारसंस्कारसज्जा वृथा ।
स्थालिकामध्यगा नो भवेद् रोटिका
जीवनं केवलं स्याद् व्यथायाः कथा ।। 10

2

फुल्लिता तावदास्ते जगद्वाटिका
शोभते सुन्दरीणां तनौ शाटिका ।
दीयते लभ्यते गृह्यते भाटिका
यावदास्ते तथा सोदरे रोटिका ।। 11

किं सुवर्णस्य पात्रैस्तथा राजतैः
किं तथा मण्डितैरासनैर्विष्टरैः ।
क्षुधिता तूदरे रे बुभुक्षा यदा
स्वाद्यते स्वे कराग्रे धृता रोटिका ।। 12

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

योऽनिशं दश्यते हन्त चाशीविषैः
संसृतेर्दुःखदैन्यश्रमक्लेशजैः ।
रोटिकाच्छोटिकां किन्नु कृत्वा ददौ
जीवनस्यामृतं वै फलं तत्कृते ।। ।3

यद् रसो वै च सेति श्रुतौ प्रोच्यते
ब्रह्मरूपं तथाऽन्नं च जेगीयते ।
वर्तते सर्वमेतत् तु सर्वंकर्षं
गूहितं विस्मृतं रोटिकागौरवम् ।। ।4

दर्शनं वर्णनं प्रख्ययोपाख्यया
भासितं ब्रह्मभूयस्त्वमानन्दजम् ।
ह्लाद आत्मानुभूतिः समाधेः स्थिति-
र्मूलमेतस्य सर्वस्य वै रोटिका ।। ।5

चर्वणा रोटिकायाश्च सा चर्वणा
तत्कृते तत्कृता जायते वर्णना ।
सा चमत्कारमुत्पादयन्ती कम-
प्यद्भुतं भ्राजते भाविता रोटिका ।। ।6

सा विभावायते जीवनाप्ते रसे
मुक्तये मृत्युपाशाच्च साऽऽलम्बनम् ।
घ्राणसन्तर्पणं कारयन्ती ध्रुवं
सा क्षुधायाः कृते किञ्चिदुद्दीपनम् ।। ।7

मेलकेऽन्योन्यसङ्घट्टचण्डप्रभा
यापि सर्वात्मिका संविदाभासते ।
रोटिका तत्र हेतुस्तु साधारणी-
भूतसत्त्वात्मिकायां प्रतीतौ ध्रुवम् ।। ।8

भावयित्री च सा कारयित्री च सा
धारयित्री तथा साधयित्री च सा ।
योजयित्री समस्ते जगद्रूपके
सन्धिसन्ध्यंङ्गयत्नाद्यवस्थान्तरम् ।। ।9

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

किं तया वैदुषी-शेमुषी-जातया
काव्यगोष्ठी - कलावार्तया लब्धया ।
नैव लब्धा सुखं कुक्षिपूरं समं
चेन्नरै रोटिका धर्मकामार्थदा ।। 20

3

निर्धनास्ते जना कामयन्ते सदा
तां तथा बालकाश्च क्षुधापीडिताः ।
आद्रियन्ते भृशं तत्र ते कर्षिता
कर्षकाः कर्मजीवाः श्रमैकव्रताः ।। 21

पण्डिताः खण्डिताः खर्वगर्वैस्तथा
यैर्मता रोटिकायाः प्रशस्तिर्वृथा ।
तुन्दिले सा तदीयोदरे सम्भृता
चङ्क्रमीतीव चोत्पादयन्ती रुजम् ।। 22

कर्षिता भ्रामिताः के न यस्याः कृते
जीविता मानवा वा यया जातया ।
सैव केन्द्रस्थिता काष्ठपुत्रान् यथा
नर्तयन्ती जनान् राजते रोटिका ।। 23

यन्नितम्बे प्रहाराः कठोरा धृता-
स्ते सटत्कारमारात् कशानां सृताः ।
यन्मुखान्निर्गतो नैव चार्तो रवो
यन्निपीता सबाष्पं तथा वेदना ।। 24

यच्च शब्दस्य राशेः कृतो विक्रयो
यच्च निक्षेप आत्मा स्वयं वा कृतः ।
यच्च हालाहलं वा निपीतं मुदा
जीवनस्यामृतं मन्यमानैर्नरैः ।। 25

Devavahi Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यद्धगज्ज्वालमालाकुले वा सुखं
भ्राष्ट्रमध्ये प्रदत्तं स्वकीयं मुखम् ।
आधरित्र्यास्तथा यन्नंभो नामितं
यच्च सिन्धोः कृतं भूयसा मन्थनम् ।। 26

यच्च भूगोलमाकाशकक्ष्योपरि
स्थापितं वा समुत्तोल्य तूलप्रभम् ।
ते प्रशस्तौ कृतं यच्च कीरायितं
रोटिकायास्तु सर्वंहि लीलायितम् ।। 27

हालिको मालिको भालदर्शी तथा
कौलिको मौलवी जालजीवी तथा ।
अस्तु वाऽध्यापको वापि नेता तथा
रोटिकायाः कृते ते समे जीविताः ।। 28

किं न लालप्यते रोटिकायाः कृते
किं न तातप्यते रोटिकायाः कृते ।
किं न सासह्यते किं न मोमुह्यते
किं न शोश्रूयते किं न बोभूयते ।। 29

हासयन्ती क्वचिद् रोदयन्ती क्वचिन्
मोदयन्ती क्वचिद् भ्रामयन्ती तथा ।
नर्तयन्ती जनान् काष्ठपुत्रप्रभान्
सा जगन्नाटिकासूत्रधारीसमा ।। 30

4

केन कस्याननाद् रोटिकेयं बला-
च्छिद्यते विस्मयोत्सेकमूढेन वै ।
मानवानां तथा शोणितैराचिता
फुल्लगल्लैरभल्लं वृथा चर्व्यते ।। 31

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अर्ज्यते रोटिका केनचित् स्वैः श्रमैः
स्वेदधाराञ्चितैरुच्छ्वसद्बाहुभिः ।
खाद्यते निःश्रमं तुन्दिलश्रेष्ठिभि-
र्गोर्गलीन् क्षेपयद्भिः कुलाङ्गारकैः ।। 32

केनचित् प्राभृतैः प्राप्यते रोटिका
केन वोत्कोचमादाय सा प्राप्यते ।
अग्रहस्तं पुरः सारयित्वा मुहु-
र्दीनदीनैः स्वरैः केनचिद् भिक्ष्यते ।। 33

राजमार्गस्य पार्श्वे तथा पद्धतौ
कुट्टिमे क्षेत्रभागैककोणे गृहे ।
साध्यते सा कुकूलस्य राशौ तथा
गोमये चुल्लके वा हसन्त्यां मुदा ।। 34

रोटिकापोट्टलीं कुक्षिपार्श्वे वहन्
कर्षकः कार्मिको भृत्य एषोऽथवा ।
याति तीव्रैः पदैस्तेन दोलायते
कम्पमाना मही तस्य सत्त्वाज्जिता ।। 35

स्वेदविन्दोर्विचित्रां स्रजं धारयन्
यः श्रमे व्यापृतो विद्यते सन्ततम् ।
एष भूमौ प्रसूनायमानां शुभां
निश्चयं वै चिनोति स्वयं रोटिकाम् ।। 36

फालकुद्दालभारः खनित्रं दधत्
सेवते योऽनिशं मानुषीं सन्ततिम् ।
रोटिकोपैति तं मार्गमाणा स्वयं
तां नृशंसोऽर्थलुब्धोऽन्तरा व्यूहते ।। 37

कल्यवर्ते गृहीता तथा भोजने
चापि माध्यन्दिने चैव सायन्तने ।
क्षीयते नैव सा पुण्यराशिप्रभा
कल्पवल्लीसमा रोटिकाऽस्मद्गृहे ।। 38

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धीयते मानसे मानिनीवानिशं
चीयतें तेजसा सप्तधा धातुभिः ।
लीयमानापि सृष्टेर्लये त्वालये
जायमाना पुनः सा कवोष्णा नवा ।। 39

निर्जराणां तथा मानवानां तथा
केवलं भेद एषोऽस्ति सार्वत्रिकः ।
यज्ञभागेन वै देवता जीविताः
रोटिकां स्वैः श्रमैः प्राप्य सर्वे जनाः ।। 40

5

रोटिका काव्यवर्ण्यं कथं शक्यते
कर्तुमित्येष यो भाषते दूषकः ।
धिक्कृतिं रोटिकाया बलेनैव स
प्रेरयत्येव सत्यं तथा नेक्षते ।। 41

यत् प्रमां मन्वते साधु नैयायिका
अर्थवादं जगुर्यच्च मीमांसकाः
ब्रह्म वोपासते यच्च वेदान्तिन-
स्तस्य सर्वस्य मूलं त्वियं रोटिका ।। 42

यावती कोमला तन्विका रोटिका
तावती सत्त्वपूर्णा च सारान्विता ।
धारयन्ती स्वयं वर्तुलामाकृतिं
किन्तु भूगोलमुद्बिभ्रतीवैकला ।। 43

सा हसन्ती हसन्तीमुखे क्षेपिता
वह्निगर्भे तथा यज्ञवेदीसमे,
पाचिता दह्यमानैस्तथाङ्गारकै-
र्जायते संस्कृता पावनी रोटिका ।। 44

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चूर्णमन्नस्य सा गोधते गेहिनी
श्लेषयन्ती समं योजयन्ती तथा ।
वृत्तरूपैः पुनः पिण्डकैराशु तां
निर्मिमीते मुदा रोटिकां सारदाम् ।।45

भावराशिस्तथा चित्तभूमौ मया
श्लेष्यते योज्यते चार्द्रतां नीयते ।
वृत्तरूपैरसौ काव्यबन्धायते
शारदा सारदा तेन वै पूज्यते।।46

भुक्तिरेषा सुखं रोटिका स्वादिता
मुक्तिरेषा गृहीता स्वतन्त्रं तथा ।
धाम कैवल्यभावस्य चैकं त्विदं
रोटिका गृह्यते मानवैः सा समम्।।47

अर्धकुम्भात्मके मृण्मये वाऽऽयसे
वह्निना तापिते स्थापिता भाजने ।
तप्यते स्त्यायते स्फायते रोटिका
पच्यमाना द्रुतं पूर्णकुम्भायते ।।48

स्याच्च सिंहस्थपर्वार्धकुम्भोत्सवः
कृत्यमेवास्तु वैवाहिकं मंगलम् ।
ईद-सम्मेलनं वा कलामेलकं
रोटिका योजयित्री समेषामियम् ।। 49

साधु काव्यं न कामं भवेन्मे त्विदं
रोटिका विद्यते किन्तु साधीयसी ।
रोटिका तुल्यमेवास्तु काव्यं नवं
जायमानं पुनर्वर्धमानं दमे ।। 50

रोटिकायाः प्रशस्तौ शुभा गुम्फिता
शब्दपुष्पैरियं काव्यमाला मया ।
तत्फलं प्राप्नुतां वै समस्तो जनो
तेन संरम्भ एष व्रजेद् धन्यताम् ।।51।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाचितं दु:खवह्नौ व्रजत् पूर्णतां
वेदनाङ्गारकैर्दह्यमानं भृशम् ।
जीवनं जायतां न: समेषां सदा
रोटिकातुल्यमेवोल्लसत् सन्ततम् ।। 52

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

7. नर्मदालहरी

प्रथमस्तरङ्गः

ध्यायेन्नित्यं गिरिवर-जटाजूटमालां मनोज्ञा-
मावर्तानां रुचिरवलितैरञ्चितभ्रूविलासाम्,
आपोमूर्तिं शफरनयनां प्रस्फुरद्बुद्बुदोष्ठीं
शुभ्रैः फेनैः स्मितशतझरीं सैकतोत्संगसौख्याम्.

नृत्योद्दामामविरलचलद्वीचिहस्तां प्रसन्ना-
मुच्छ्रायैस्तैर्लहरिजनितैराप्तवक्षोजशोभाम्,
आ विन्ध्यादा विततपुलिनश्रोणियुग्मां पयोधे-
र्ब्रह्माण्डस्य द्रवपरिणतिं नर्मदां नर्मदात्रीम्. 1-2
(सन्दानितकम्)

पात्रात् पूर्णाच्चुलुकलुलिता याऽऽम्रकूटाद् विधातुः
क्रोडीकर्तुं भुवनमखिलं या विराट् सम्प्रजाता,
गुप्ताऽऽकाशे भुवि च वितता गह्वराणि प्रविष्टा
सा त्वं देवि प्रकटमहिमा जाह्नवीव त्रिमार्गा. 3

उत्तालचञ्चलमिल्लहरीप्रवाहां
धाराञ्च यस्तरति ते तरसा तरस्वी,
नूनं तरेत् स सहजं किल हेलयैव
संसारसागरतरङ्गकुलं त्वपारम्. 4

वर्षासु या गिलसि दीनगृहान् कुटीरान्
ग्रामांश्च वृक्षनिचयान् बहुभूविभागान्,
तांस्तान् समुत्सृजसि नूत्नतया पुनस्त्वं
विश्वम्भरेव च बिभर्षि जनं प्रकामम्. 5

सृष्टिं स्थितिं लयमपि क्रमशो दधाना
लोकस्य भारतगतस्य चराचरस्य,
कल्याणि कल्पशतकर्मनिराकुला त्वं
धातुर्विभुत्वमयि किं प्रकटीकरोषि. 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्पृष्टस्त्वया चरणदेशगतैरमीभि-
श्चान्दोलितैः स्वलहरीविततैः कराग्रैः,
अद्यापि गर्वमतुलं वहतीह विन्ध्यो
सर्वान् हसन्निखिलविश्वगतानिवाद्रीन्. 7

पाषाणराशिरभिपत्य तरङ्गहस्तै-
र्यस्तक्ष्यते मसृणितस्तव शिल्पदक्षैः,
सा नर्मदेश्वरवपुः पुरुरूपमेति
ते ब्रह्मणो विभवमप्यतिशय्य सृष्टिः. 8

सूक्ष्मोऽपि बालशशिशुभ्रकलाभिरामः
स्रोतोमुखाज्जननि सम्यगणोरणीयान्,
बिन्दुः स्रवन्नमरकण्टकपर्वतात् ते
सिन्धुर्भवत्यतितरां महतो महीयान्. 9

ज्येष्ठा त्वमेव भगिनी खलु चासि मात-
र्गङ्गाद्यशेषसरितां किल सर्वपूज्या,
प्रत्नाप्युषेव सततं प्रतिभासि नव्या
भव्यं समुल्लससि वाक् सुकवेर्यथाऽऽद्या. 10

कुण्ठाँ अकुण्ठितजलप्रवहैस्त्वदीयैः
कुण्ठीभवन्ति विगलन्ति च निस्सरन्ति,
आशा उदेत्य विकसन्ति समुल्लसन्त्यो
राशीभवन्ति च तवोर्मिशतप्रवृद्धाः. 11

त्वत्सैकतेरकलुषैः सरसै रजोभिः
प्रक्षालितानि च रजांसि मनोगतानि,
त्वत्तीरकुञ्जनिवहस्य तमोभिरेभि-
र्दूरीकृताः किल तमोनिवहा नराणाम्. 12

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वितीयस्तरङ्गः

नो सद् बभूव किल नैव बभूव चासत्
सृष्टिर्यदा न च समुल्लसिता पुराऽऽसीत्,
निर्वात एव च समुच्छ्वसिति स्म चैकः
शून्यस्य गह्वरगतस्तव वारिराशिः ।3

आदौ ससर्ज पुरुषः प्रविभज्य मूर्तिं
स्वीयामपां प्रवहमुल्बणधारमारात्,
तस्मादिदम्प्रथमतः सहजं प्रसूता
ते नर्मदे जलमयी विमलाऽऽद्यसृष्टिः ।4

विन्ध्याचले शतपुटे परिवर्त्तमानं
चानन्त्यरूपमतुलं तव वारिराशिम्,
अभ्यर्थितः सभयशङ्कितदेववृन्दै-
र्धातापि नास विनिवारयितुं समर्थः ।5

आद्योऽवतार इह मानवसभ्यताया-
स्तीरे तवैव किल सोऽपि बभूव मातः,
जीवाश्म - शैलनिचयाः किल कच्छदेशे
यत्साक्षिणोऽत्र विलसन्ति पुरातनास्ते ।6

विन्ध्यावलिं स्वदयितामुपवेश्य पार्श्वे
राजा बलिर्यजति ते स्म तटान्तभूम्याम्,
शुक्रेण वक्रनयनेन निवारितोऽसौ
सत्यप्रियो व्रतमपूर्वमिहैव तेने ।7

माहिष्मती नृपसहस्रभुजार्जुनस्य
रम्या ललास नगरी च तवैव याऽङ्के,
वारिप्रवाहपरिधौतसहस्रसौधा
रोमाञ्चितेव ननु भाति समृद्धशोभा ।8

आगत्य ते तटमिहैव च रावणोऽपि
भक्तः शिवस्य च विपश्चिदपश्चिमोऽसौ,
मारीचमाह शुकसारणमन्त्रिमुख्या-
नाचम्य नार्मदपयोमधु नन्दतेति ।9

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

छद्मप्रवञ्चनदुरोदरविप्रलब्धा
निष्कासिता निजगृहान्निजराज्यदेशात्,
ते पाण्डवास्तव तटान्तमुपेत्य हृष्टाः
सम्मेनिरे बहुगुणं स्वमरण्यवासम् . 20

संन्यासमेत्य च नवे वयसि प्रगल्भोऽ
सौ शंकरोऽत्र समुपेत्य च केरलेभ्यः,
श्रीगौडपादपरिपूतसमृद्धबुद्धि -
श्चाद्वैततत्त्वमखिलं विशदीचकार . 21

यत् तत्कमण्डलुजलं बहुलीभवन्ती
पातुं स्वयं गिरिगुहां समुपागता त्वम्,
माहात्म्यवृद्धिकरणाय च तस्य सोऽयं
कोऽपि क्रमो भवति ते प्रकटीकृतस्तत् . 22

सौन्दर्यसारसमुदायमयीभिराभि -
श्चानन्दकन्दकलिताभिरहो तवैव,
संवेदितः कविरसौ लहरीभिराद्यं
वाचो वितानमतनोल्लहरीद्वयेन . 23

मन्त्रैर्गूहाः शुकमुखोच्चरितैर्जुगुञ्जु
स्तेभारती - विलसिता लसिता यदीयाः,
मिश्रः स मण्डन इहैव च भारतीशो
भाष्यं महेश्वरपुरेऽप्रतिमं ततान . 24

तृतीयस्तरङ्गः

उल्लोलवेल्लितदृषत्परुषप्रहारै -
रुत्काललोललहरीभिरमूभिराढ्यम्,
आलोडयस्यविरलं त्वमलं जलं स्वं
मध्यप्रदेशधरणीमभितो वहन्ती . 25

आगुर्जरान्मरुभुवो मरहट्टदेशाद्
यं स्मामनन्ति लसितं तव वीचिभङ्गैः,
आर्यं तु राष्ट्रमिह ते किल पूर्वजा नः
सीमास्त्वया विशदिता निखिलास्तदीयाः . 26

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आम्रैः पिशङ्गकपिशैर्विततताम्रकूटे
कम्राश्च वृक्षनिचयाः प्रविभान्ति नम्राः,
यत्र त्वयाप्यमरतामभरैकदृश्यो
नीतो गिरिस्त्वमरकण्टकसंज्ञकोऽयम्. 27

वक्षोगतं जननि ते धवलं स्रवन्तं
पुण्यं पयश्च बहुधा बहुधारयुक्तम्,
तं निर्झरं कपिलसंज्ञकमेत्य केषां
चेतांसि दुग्धधवलानि न वा भवेयुः,28

प्रस्थोच्चयं दुरधिरोहममुं त्वमेयं
मेयं करोपि लहरीगुरुमानदण्डैः,
आरुह्य चोर्ध्वमतुलप्रबलोर्मिभङ्गै-
राविष्करोषि विमलं प्रणवस्वरूपम्. 29

आवर्तबुद्बुदतरङ्गसहस्रनादै-
स्तीरप्रघट्टजनितैः किल कोणघातैः,
वंशीरवैश्च लहरीपवनप्रणुन्नैः
सन्ध्याबलिं प्रकुरुषे किल चन्द्रमौलेः. 30

ग्रामास्त्वया कति च पावनतां न नीता-
स्तीर्थीकृताः कति सघोषमहो न घोषाः,
स्पृष्टं यदेव लहरीभिरहो तव स्यात्
स्थानं ह्यधिष्ठितमदो भवतीह देवैः. 31

याः सन्ति निर्मलजलोर्मिकलास्त्वदीया
अत्यन्तमेव मसृणाः सुकुमारकल्पाः,
जायन्त एव च खराः किल टंकिकास्ता-
श्छेत्तुं शिलाश्मनिचयान् गिरिशृंखलानाम्. 32

विन्ध्यो हिमाचलगिरेरपि चाग्रजोऽयं
वृद्धो गतश्च जडतां किल कोटिकल्पैः,
आमृष्टमात्र इह तैः सरसैरवन्ध्यैः
सद्यः प्रयाति नवयौवनतां जलैस्ते. 33

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विच्छिन्नमेखलविलम्बिनितम्बबिम्बं
प्राघट्टमानचरणं विनते गिरौ त्वम्,
स्वैरं निदर्शयसि चोर्ध्वमधः सरन्ती
क्रीडापरेव पुरुषायितसम्प्रयोगम्. 34

त्वामेव मेकलसुते कलयन्नसौ स्वं
देहं तथावनमयन् स्पृहयन् जिघृक्षुः,
त्वं त्वेनमप्यविगणय्य लघु प्रयासि
तं स्फाटिकं गिरिमहो कमनीयकान्तिम्. 35

धूमोऽपि शंखधवलः प्रतिभाति योऽस्मि-
न्नुत्पीड एष किल चास्य जले चकास्ति,
वह्निं विनापि सुभगो नयनाभिरामः
सर्वस्तवैष महिमास्त्यतुलप्रभावः,36

पुर्यां पुराणबहुमानपदां त्रिपुर्यां
सम्प्राप्य दुग्धधवलां नगश्रृंखलां ताम्,
सम्मार्ज्य वर्धयसि शुभ्रगुणं त्वमस्याः
श्रीकण्ठ - हास्य - सुधयेव विलेपयन्ती. 37

निर्मासि पर्वतशिलाः प्रविभिद्य सद्यः
पातालमूलगत - वानरकूर्दनीं ताम्,
विश्वप्रपञ्चचतुरं किल विश्वकर्म-
कर्माणमेव च विहस्य तिरस्करोषि. 38

चतुर्थस्तरङ्गः

अस्मिन्नगस्त्यचरणानमितेऽमले ते
विन्ध्याचले ननु चले कथमस्तु वासः
पाषाणपूरपरिपूरितदिङ्मुखे खे
पूरस्तवावतरणं नु कथं विदध्यात्. 39

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यद् यासि वक्रलहरीभ्रमितं च हित्वा
दूरं प्रवञ्चितमिव प्रयतं गिरिं त्वम्,
तत् ते स्वभावसदृशं, किल दुर्निवारं
को वै प्रतीपयतु तेऽविकलं प्रवाहम् ?40

स्पृष्टस्त्वयोच्छ्वसिति जीवनलाभमेष
प्राप्तो, गिरिः सकृदयं च मुमूर्षतीव,
त्वामेव चिन्तयति खेदविखण्डितैः स्वैः
पाषाणखण्डवदनैर्विमनायमानः.41

भाग्येन चैनमभितः क्वचिदेकदेशे
शुष्के निवास इह चास्य जनस्य जातः,
लभ्या ततो न सहजं किल वारिधाराः
पुण्या प्रसन्नमधुरास्तव देवि रम्याः.42

व्यस्तः समस्त इह कृत्यभरे प्रसक्ते
पश्यन् व्रजन् बहु पठन् विहरन् तथाऽश्नन्,
त्वामेव देवि बहुधा किल कातरोऽहं
विद्यां प्रमादगलितामिव चिन्तयामि.43

आस्था न लोलमनसो मम चास्ति पूर्णा
न श्लिष्यतीह च मनोऽपि समग्रभावात्,
सामिप्रसक्तमनसा च समेरिता ये
शब्दाः प्रसादनपराः किल तान् गृहाण.44

सिप्रां शतद्रुमपि तां विततां वितस्तां
वेत्राढ्यतीरयुतवेत्रवतीं दशार्णाम्,
तां ब्रह्मपुत्रसरितं किल कामरूपां
कृष्णां समापितवतीं निखिलां च तृष्णाम्.45

गोदावरीमघहरीममलां च वेणीं
चर्मण्वतीं रुचिमतीं च महानदीं च,
गंगां विहाय यमुनाममुनैव ते मे
भावेन संस्थितमिदं च मनोऽसमग्रम्.46
(सन्दानितक्म्)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वत्सा यथाकुलतरास्तरसा व्रजेभ्यो
गावं स्वकीयजननीमिह मार्गयन्ते,
एवं मदीयमनसो निखिला विकारा:
कारां विभिद्य शरणं तव यातुकामा: . 47

नानाऽऽधिभिर्बहुविधं च तथा ततोऽहं
सङ्केतहीनमिव पत्रमितस्ततोऽटन्,
सङ्केतमेव च तव प्रतिपालयामि
भ्राम्यन् भ्रमाकुलजगत्यतिखिन्न एष: 48

व्यर्थप्रसक्तबहुपत्रभरे किलेदं
निष्पत्रवृक्ष इव याति च जीवितं मे,
कार्यालयान्तरगते विततेऽत्र कृत्ये
कृत्यावरोधजनके जननीं विना त्वाम् . 49

यस्मिन् दिने स्मृतिमुपैषि न देवि मे त्वं
तद् वै दिनं न मम जीवनलेखवर्ति,
यस्मिन् क्षणे सुमनसा न मया गृहीतं
ते नाम स क्षण इहास्ति न मे क्षणो वा . 50

त्वत्तीर्थवारिसदृशं च मधु स्रवन्तं
वाग्धारमेष विमलं किल कामयेऽहम्,
ते जीवनप्रदजलप्रतिमं ममेदं
मात: समग्रमपि जीवनमस्तु काम्यम् . 51

त्वां बान्धवीं विनलबन्धुरवारियुक्तां
बन्धप्रबन्धविषये ह्यनुबन्धवन्त:,
बद्धुं सयत्नमिह तेऽभिलषन्ति भूय:
स्वार्थैकसाधनपरा व्यवसायनिष्ठा: . 52

यन्नो सहस्रभुज एतदहो शशाक
बद्धुं त्वदीयपयसां किल विश्वरूपम्,
विन्ध्यस्तथा शतपुट: किल चाम्रकूट-
स्ते पर्वता विदलिता इव यत्समक्षम् .

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तं चामृतात्मकममुं त्वमरैकवन्द्यं
सञ्जीवनौषधिरसप्रभवं प्रवाहम्,
आनन्त्यदर्शिनमलभ्यतलं सुधारं
किं धारयेन्नु मनुजाधम [illegible] मातः . 53,54
(सन्दानितकम्)

यावद् रेवा वहति भुवने यावदास्ते च विन्ध्य-
स्तावद् वाणी सरसरुचिरा स्त्यायतां सत्कवीनाम्,
गुञ्जन्तोऽस्मिन् मम च रुचिरे नर्मदाप्रान्तभागे
कुर्वन्त्वेते कलमविरलं छान्दसाः सुप्रपा[illegible]ः 55

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

8. मृत्तिकालहरी

भ्रमत्कुलालचक्रके धृता जलेन मिश्रिता ।
करेण सा नरेण यन्निवेशितोच्चयं गता ।।1

क्षणेन कामपिच्छविं मयूरपिच्छविच्छुरीम् ।
विचित्रकामनीयकां पुरस्करोति मृत्तिका ।।2

घटी भवत्यखण्डपात्ररूपतां प्रयाति सा ।
मनोहरां तथाऽऽकृतिं कृतिं दधाति नूतनाम् ।।3

नवीनकान्तिदीपिता प्रतिक्षणं प्रजायते ।
रसान्विता कलामयी समन्विता च सौष्ठवैः ।।4

क्वचिद् ध्वजायिता क्वचिद् गजायिता रथायिता ।
विहङ्गमायिता क्वचित् तुरङ्गमायिताक्वचित् ।।5

करोति देवदानवं च मानवं नवं नवम् ।
सनक्षर्मक्षिणां द्रुतं सजीवभावमागतम् ।।6

अनल्पशिल्पकल्पनाममन्दरूपसञ्चयम् ।
चिनोति मृत्तिकाचये नरः कलाविभाविते ।।7

समुच्छलत्प्रमोदितं तथाऽऽशु जानुयुग्मकैः ।
इहैव रिङ्गितं चिरं सकौतुकं तु लीलया ।।8

प्रधावितं च शैशवे ऽत्र मृत्तिकाचितेऽङ्गणे ।
विनिर्मितानि गेहकानि तानि सैकतानि वा ।।9

अलक्ष्यदन्तकुड्मलाः कुटुम्बिभिर्गवेषिताः ।
अभक्षयाम मृत्तिकां तदा निलीय कोणके ।।10

परोक्षतां गतापि साऽ स्थिरक्त-मांस-संहतौ ।
समस्तदेह पिञ्जरेऽस्ति मृत्तिका समाचिता ।।11

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सदा समुच्छ्वसन्नरैः स्वयं तु गृह्यतेऽन्तरा ।
विनिःश्वसन्नरैस्तथा बहिश्च सैव सार्यते ।। ।2

निलीय बर्हिणोऽण्डके समन्विताच्छटाद्भुता ।
तथैव मृत्तिकालवे लयं गतं चराचरम् ।। ।3

नवाङ्कुरैरचेतनं सचेतनं प्रजायते ।
अशून्यतां प्रयात्यहो जगत् सशून्यतां गतम् ।। ।4

असन्मयं च सन्मयं निरन्तरं प्रकुर्वती ।
चमत्कृतिं तनोति सा विभाव्य रूपसञ्चयम् ।। ।5

यदेव बीजमुप्यते ऽत्र निम्नतोऽपि मृच्चये ।
तदोर्ध्वगामि जायतेऽङ्कुरायते नवायते ।। ।6

क्वचित् स्फुरध्हरित्प्रभाप्ररोहशोभिदूर्वया ।
अलङ्कृतेन्द्रगोपिकागणैर्विभाति मृत्तिका ।। ।7

त्विषां चयं प्रवालजं विहस्य सा सृजत्यलम् ।
प्रसूनराशिसञ्चयं च रक्तपीतपाटलम् ।। ।8

द्रुमं सुमप्रफुल्लितं तनोति कल्पवल्लरीम् ।
अकिञ्चना न किञ्च किञ्च सम्पदं तनोत्यसौ।। ।9

सुवर्णरूप्यकं निधिं च धातुजातसम्पदम् ।
अमूल्यशेवधिं सदा ददात्यमूल्यसेवया ।। 20

परिश्रमार्जवार्जितं पदं तथैव साऽमृतम् ।
सुखास्पदं निरापदं च सन्तनोति सन्ततम् ।। 2।

स्तनन्धयः शिशुर्युवा नरो वयस्कतां गतः ।
अनन्तरं प्रजायते तु वृद्ध एष चान्ततः।। ।22

समन्वितं तु सन्धिभिः पञ्चभिर्हि जीवनम् ।
यथाङ्कपञ्चकैर्युतं प्रयुज्यमानरूपकम् ।। 23

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रयुज्यतेऽभिनीयते तथैव चावसीयते ।
नरेण मृत्तिकाङ्क एव सुप्यते तथाऽन्ततः ।।24

प्रजायते प्रवर्धते प्रभिद्यते प्रलीयते ।
समस्तवस्तुजातमत्र भङ्गुरे प्रपञ्चके ।।25

इयं न भिद्यते न वा प्रहीयते न लीयते ।
विनाशमेति नैव वा समस्तवस्तुषु स्थिता ।।26

सुरम्यसौधसन्तति सुसज्जया समन्विता ।
निवेश्य कोटि वैभवं कुरीत्यनार्जवार्जितम् ।।27

नभःसमागमाय या समुच्छ्रिता विजृम्भते ।
प्रयाति मृत्तिकालयं च धूलिसाद्भवत्यरम् ।।28

अनल्पकल्पनाततं तु राज्यमाशु निर्मितम् ।
धनं तथैव सञ्चितं परिग्रहेण सम्भृतम् ।।29

कृतं च कामनाञ्चितैर्भुवि स्मयाद् गतागतम् ।
वृथा गतं तथाऽखिलं न नास्तमेष्यतीह तत् ।।30

न शिष्यतेऽत्र कामना न वासना न भावना ।
न केलिकौतुकान्विता न मानिनीषु राधना ।।31

न शिष्यते कथा वृथामदस्मरस्मयान्विता ।
इयं परन्तु शिष्यते विशिष्यते च मृत्तिका ।।32

इयं च रक्तकापिशा च बभ्रुपीतपिञ्जरा ।
विभिन्नवर्णसौष्ठवा च धातुरागरञ्जिता ।।33

हिमाद्रिसानुकोटिभिश्च कोटिशः प्रधारिता ।
तथैव विन्ध्यशृङ्खलाविराजमानविस्तरा ।।34

सदैव बिभ्रती जनं विवाचसं विवाचसम् ।
अनेकधर्मसंश्रितं मतान्तरावलम्बिनम् ।।35

विभिन्नवेशभूषया सुसज्जितं विसज्जितम् ।
वनस्पतिं प्रफुल्लितं विपत्रनिःसुमं समम् ।।36

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विनिर्मितं महज्जगत्प्रपञ्चचित्रमद्भुतम् ।
तदीयभित्तिरस्ति सा चराचरान्तरात्मिका ।। 37

पटेषु तन्तुसन्ततिर्यथासमन्विता सदा ।
समस्तवस्तुषु स्थिता तथैव मृत्तिकैव सा ।। 38

पुरातनी सनातनी सदैव सुस्थिराऽमृता ।
नवायते विवर्तते विभिन्नभावमेति सा ।। 39

गृहीत एष ते करो मया करे प्रकाम्यया ।
करं करं तथान्तरा विलीय मृत्तिका स्थिता ।। 40

सुविस्तृतं रसच्छदि प्रकृष्टवृत्तिभित्तिकम् ।
सुमानुषं गृहं त्विहाधिमृत्तिकं विनिर्मितम् ।। 41

न वैभवं च कामये पुनर्भवं तथान्वये ।
द्विजन्मनां स्वजन्मनात्तपङ्क्तिपावनात्मनाम् ।। 42

सदार्थसार्थमन्वहं व्ययाय नापि कामये ।
सदर्थराशिरव्ययो भवेत् स नव्य एव मे ।। 43

न गौरवान्मृषाऽऽदराद् दरान्न चैव सम्भ्रमात्
न लाभकाम्यया तथा न चाटुकारितेच्छया ।। 44

मदावलिप्तदुर्जनं पदप्रतिष्ठितं मया ।
प्रधाव्य पादधूलिभिः प्रणम्य लाञ्छितं शिरः ।। 45

अवापि नैव पण्डितैः कृतं तथाभिनन्दनम् ।
न वन्दनं न सादरं जनस्य चाभिवादनम् ।। 46

यदीह नापि विद्यते धनं पदं च गौरवम् ।
जयध्वनिश्च मेऽ ध्वनि ध्वनन् जुगुञ्ज नोऽथवा ।। 47

इयं परन्तु विद्यते मदीयपादयुग्मकम् ।
अधः स्थिता सुसंस्थिता दृढा तथैव मृत्तिका ।। 48

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्पृशमि मृत्तिकामिमां च यावदन्वहं त्वहम् ।
समुल्लसत्यहो रसान्वितं क्षणं क्षणे ।।49

इयं तु धन्यभाग्यताऽ स्य जीवनस्य विद्यते ।
स्वदेशभूमिमृत्तिका धृता स्वमस्तके च यत् ।।50

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

9. अद्यापि - लहरी

अद्यापि चित्तमिदमाकुलयन्ति भूयः
कर्माणि नैव विहितानि कृतानि तानि ।
व्यालीव सर्पतितरां तरसा च शङ्का
प्रश्नास्तथा चुलुकयन्ति भृशं मनोमे ।। 1

स्पर्शः पुरा परिचितो नियतं य आसीत्
सञ्जीवनश्च मनसश्च रसायनं तत्
लुप्तोऽधुनाजटिलजीवनजीर्णमार्गेऽ
द्यापीह गीर्भिरिह तं च गवेषयामि ।। 2

कोलाहले ऽत्र विकटे विकलाः प्रणष्टाः
शब्दाः पुरातनमनीषिजनैः सुस्टष्टाः ।
शब्देषु शब्दान् मिलितान् किलाद्या-
नन्वेषयामि गहने खलु दीपिकाभिः । 3

अद्यापि विस्तृत — गतागत — राजमार्गे
सङ्कीर्णलोकनिवहे प्रथितां पुराणीम् ।
लुप्तां क्वचिन्नवपदैरधुना स्वकीयै-
स्तां पद्धतिं स्वयमहं ननु मार्गयामि ।। 4

अद्यापि कुक्षिकुहरे परिक्षिपतीयं
क्षुच्चक्षुगोलकविवर्तननाट्यदक्षा ।
जिह्वा चमत्कृतिलयभ्रमितालास्या
लोलं प्रनृत्यति रसान्मुखरङ्गपीठे ।। 5

अद्याप्यपूपघृतपायसमोदकेषु
स्वादो रसीयति च सोऽपि [illegible]थोदकेषु
गन्धानुभावसुभगा परितर्पयन्ती
घ्राणं तथा रसवती भवति प्रकामम् ।। 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वार्धक्यनुन्नपरिसर्पिरुजाकुलानि
गात्राण्यमूनि शिथिलानि च निष्क्रियाणि
कृष्टानि रज्जुततिभिः किल चित्तवृत्ते-
रद्यापि यान्ति विहरन्ति समुन्मिषन्ति ।। 7

माने निरन्तरमपि क्षतविग्रहे ऽस्मि-
न्नास्कन्द्यमान इव चेश्वरयादघातैः ।
अद्यापि चेतसि मनस्विजनस्य सोऽयं
जागर्ति कोऽपि दृढमानमयो विकारः ।। 8

गोष्ठ्यां मया स्वविषये प्रतिपाद्यमाने
वाचां प्रवाह इव मे सतृणं पिबन्ती ।
नेत्रेण शब्दसरितामिव वाहयन्ती
सस्मेरसस्मितमुखीस्फुरिताधरोष्ठी ।। 9

अद्यापि मे स्मृतिमुपैति यदा कदाचित्
काचित् क्वचित् कतिपयानि दिनानिदृष्टा ।
क्षीणं ममायुरनिशं परिहीयमानं
वर्षैस्तथा द्विचतुरैः परिवर्धयन्ती ।। 10

अद्यापि जीवनमहाब्धिविवर्तनानां
निःसीमविस्तृतिमये विकटप्रसारे
आवर्तबुद्बुदतङ्गविकारयुक्ते
कारुण्यपूरपरिपूरमिवावशिष्टम् ।। ।।

अद्यापि संस्खलितगद्गदवाक्प्रचारै-
र्निर्व्याजसस्मितकलैर्मिलिताट्टहासैः ।
अम्बेति जानुगमनो गदतीह बालो
व्यक्तस्वदुग्धरदनालिविशेष मुग्धम् ।। 12

अद्यापि गां न तु न पावयतीह गङ्गा
सक्तप्रदूषितजलैः परिपूर्यमाणा ।
नो वा न रेवति निरन्तरमत्ररेवा
बन्धप्रतानविततं परिबध्यमाना ।। 13

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विन्ध्याटवी न सघनैर्विततैर्निकुञ्जै
व्याप्ता धवैर्न वकुलैर्न रसालपुञ्जैः ।
प्रोच्चण्डसत्त्वरवगुञ्जितभूमिभागा
नो कम्पते धरणिरप्यनिशंत्विदानीम् ।। 14

विन्ध्यः परन्तु करुणामयदृष्टिपातै-
राशान्वितः किमिह पश्यति दक्षिणाशाम्
अद्यापि यत्र घटसम्भवपादचिह्नै
रुट्टङ्किता वसुमती प्रविभाति नूनम् ।। 15

अद्यापि चेतसि चमत्कृतिमातनोति
व्याप्तस्तथास्य विततैः शिखरैः प्रदेशः ।
उत्तुङ्गकूटविकटैः सततं ततोऽयं
गर्तैश्च गह्वरचयैश्च नदैः सरिद्भिः ।। 16

हंसा गताः क्व नु च ते तदिदं न जाने
नो सारसाश्च सरसा विहरन्ति ते वा ।
अद्याप्युलूकमिथुनः क्वचिदत्र सायं
घूत्कारभैरवरवः प्रविभाति वृक्षे ।। 17

अद्यापि तन्मनसि सम्परिवर्तते मे
कक्षासु यद् गुरुजनैर्गमितोऽस्मि हीनैः ।
आमृष्टकर्णमतिनिष्ठुरधृष्टशब्दै-
र्मर्मोपघातिभिरकारणमेव दुःखम् ।। 18

अद्यापि मे स्मृतिपथं सहसा प्रयान्ति
गाढान्धकारघनजालतडित्प्रभाभाः ।
ते ऽ ऽध्यापकाः प्रतिभया परितोष्यमाणाः
शिष्यात् पराजयमपि स्वजयं वदन्तः ।। 19

अद्यापि दण्डकवने ह्रियते च सीता
क्रूरेण दस्युचरितेन दशाननेन ।
नायाति किन्तु बत कश्चिदहो जटायु-
स्त्रातुं विदेहदुहितां करुणं लपन्तीम् ।। 20

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृष्णा च कृष्णचरितेन तथा सभायां
दु:शासनेन गतभीतिनयेन कृष्टा ।
अद्यापि दीनवदनेन जनने दृष्टा
कृष्णं समाहृवयति दीनगिरा भयार्द्रा ।। 21

"दुष्यन्त " एष मृगयारसलुब्धचेता
अद्यापि हिण्डत इहैव च कामविद्धः ।
व्यग्रा स्वकर्मणि परन्तु शकुन्तला तं
निर्भर्त्स्य याति समयं परिपालयन्ती ।। 22

अद्यापि गुञ्जति रवः किल भैरवोऽसौ
दुर्वाससो ज्वलितवह्निसमोऽतितीक्ष्णः ।
शापस्य च स्मृतिविनाशकरः समन्ता-
च्छ्रुत्वापि तं विहसतीह च कण्वकन्या ।। 23

उत्सार्यतेऽतिकुटिलैः कुटिलस्य पुत्रः
कौटिल्य एष, मदगर्वभरावलिप्तैः ।
नन्दैर्महाभुजबलार्दितविश्वनन्दैः
सानन्ददर्शितघृणं प्रकटावहेलम् ।। 24

अद्यापि 'हन्त प्रभवन्ति दुरन्ततापाः
कर्णेजपाः खलधियः किल चाटुकाराः ।
येषां वचोमसृणकोमलनावनीते
तेऽपि प्रभावगुरवः प्रभवः स्खलन्ति ।। 25

अद्यापि तन्मनसि सादमिहादधाति
व्यक्तान्धकारततिभिर्गिलिते प्रकाशे ।
पङ्क्तौ स्थिते प्रथममेव मयि प्रकाशं
षिड्गैर्बलाद् विगमिते किल पृष्ठभागम् ।। 26

उत्सारितोऽस्मि सबलैरपसारितो यद्
यद् विस्मृतोऽस्मि च सदःसु निराकृतो वा ।
तन्नो दुनोति हृदयं स्वजनैः परं तै-
रद्याप्युपेक्षित इति व्यथते मनो मे ।। 27

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

म्लायन्ति तानि सुरभीणि सुमानि माल्ये
कण्ठस्थितानि खलनेतृजनस्य मञ्चे ।
पश्चाज्जुगुप्सितधिया ऽपहृतानिं येषां
मूर्ध्नि स्थितिर्बहुमता सुधियां सुराणाम् ।। 28

अद्यापि तानि कुसुमानि च कुट्टिमेषु
क्षिप्तानि चैव मृदितानि नखाङ्कितानि ।
कार्यक्रमे खलु समाप्तिमितः प्रयाते
यातैर्जनैः स्वचरणैरवताडितानि ।। 29

अद्याप्यरुन्तुद उपक्रम एष कोऽयं
सत्रं तु यत् समुपकल्पितमप्रबन्धम् ।
अश्वा न सन्ति न च दिग्विजयस्य वार्ता
किन्त्वश्वमेधमिह तत् क्रियते च यज्ञम्।।30

नाध्वर्यवो न तथर्त्विज आह्निकेऽस्मिन्
होतार एव न च ते समुपस्थिता वा ।
भण्डैः प्रचण्डधनिकस्तु सहस्रचण्डी-
यज्ञं समाचरति डम्बरधर्मबन्धुः ।। 31

ताटस्थ्यमौनिषु च विज्ञजनेषु मौग्ध्यात्
पाखण्डदाम्भिकजनेषु गतेषु वृद्धिम् ।
देवास्तु देवगृहतः किल ते प्रयाता
अद्यापि कीर्तनमिदं क्रियते च तेभ्यः ।। 32

अद्याप्यसावतितरां पुरुषो जुहोति
स्फीतो निपीत इव गर्वपरम्पराभिः ।
आज्यं प्रसक्तबहलेषु हुताशनेषु
प्राज्यं स्वराज्यमधिगन्तुमयं प्रयत्नात् ।। 33

अद्यापि निर्धनगृहे शिशवस्तथार्ता
अन्नस्य नैव कणिकामपि ये लभन्ते
दीना मृता कति जनास्तु बुभुक्षयैव
स्वप्ने ऽपि ये न ददृशुर्घृतदिग्धमन्नम् ।। 34

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यन्मन्दिरं किल विहाय गतः स रामो
यन्मस्जिदेऽपि विरतोऽस्ति नमोध्वनिः सः ।
एतद्द्वयं समधिकृत्य वृथा विवाद-
श्चाद्यापि खेदजनको न विराममेति ।। 35

अद्यापि सङ्कुचति धर्मपथः पुराणः
सन्तस्तथैव कथिताः कलहायमानाः ।
सन्त्यत्र, तेन किल भारतमातृचेत-
श्चेखिद्यते ऽतिकरुणं व्रणमर्मविद्धम् ।। 36

अद्यापि जीवनमिदं न गतं विरामं
शक्यं समुच्छ्वसितुमत्र तथापि कामम् ।
आशा न रिच्यत इह प्रतिहन्यमाना
गङ्गेव सा हिमवतोऽविरतं स्रवन्ती ।। 37

एते भवन्ति पलिता अधिमस्तकं मे
केशास्तथापि विरता न जिजीविषेयम् ।
अद्यापि दक्षिणकरस्य दृढो ग्रहो मे
यावल्लिखामि कलमेन च कम्पहीनः ।। 38

अद्याप्युदेति सविता त्वविता जनानां
प्राच्यां स नित्यमिह सन्तमसां निहन्ता ।।
यन्ता समस्तजगतो जडजङ्गमानां
गन्ता तथा गमयिता स्वकरप्रकाशैः ।। 39

अद्यापि मे हृदयमुन्मदयन्ति कान्ता-
प्रोक्तानि कान्तललितानि पदानि सद्यः ।
सन्तर्पणं च हृदयं विकलं नयन्ति
म्लानं च जीवकुसुमं प्रविकासयन्ति ।। 40

लूने वसन्तलतिका कुसुमप्रताने
विष्टम्भिते च सकले ऽपि लताप्ररोहे ।
अद्यापि किन्तु लसतीह पुरातनी सा
नूनं वसन्ततिलका नववाक्कलाया ।। 41

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जड़गम्यमानशतकोटिनरैरस्ततायां
पूर्वैः पुरातनयुग कृतसञ्चरायाम् ।
अद्यापि मे चरणयुग्ममिदं धराया-
मायाति याति गतिमद् भवतिप्रकामम् ।। 42

सौधैश्च यद्यपि ततां गगनं स्पृशद्भि-
स्तैस्तैर्महानगरराजपथैश्च कीर्णाम् ।
अद्यापि तां क्षितिजपर्यवसायिपृथ्वीं
दूरं विलोकयितुमस्मि सुखं समर्थः ।। 43

यत्राङ्कितं भवति मे चरणस्य चिह्नं
धूल्या मृदा मसृणया किल धार्यमाणम् ।
अस्मिन्नलक्षितनतोन्नतभूविभागे
त्वद्यापि यामि विहरामि नयामि कालम् ।।44

आतङ्कितास्ति वसुधा वसु धारयद्भि-
श्चाद्यापि यद्यपि खलैः कलहप्रसक्तैः ।
वैदेशिकीं कुटिलनीतिमपि श्रयद्भी
राष्ट्रं च लोलुपधिया विभजद्भिरेनम् ।। 45

अद्यापि यान्ति वितते किल लोहमार्गे
यानानि पञ्चनददेश— दिशासु दूरम् ।
हृत्कम्पशब्दमिव तारतरं पृथिव्या
आरात्तथापि सततं खलु गुञ्जयन्ति ।। 46

तानेव शब्दनिचयांस्तु नवार्थयुक्तां-
श्छन्दांसि तान्यवितथं च तथा प्रयोक्तुम्
अद्यापि चास्मि लहरीं नवभावपूर्णां
सन्दर्भनूतनतया लिखितुं समर्थः ।। 47

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भूतं च भावि च भवच्च भवस्वरूपं
जानाति कः करतलामलकानुरूपम् ।
अद्यापि किन्तु सतता किल लोकयात्रा
चाद्यापि नैव विरतो मनुजस्य कर्म ।। 48

अद्याप्यसौ भ्रमति तां स्वधुरं वहन्ती
सूर्यं तथैव परितः किल भूतधात्री ।
नक्षत्र तारकविशाल सुपर्णयुक्त-
ब्रह्माण्डपादपगता कलिकेव नूत्ना ।। 49

आहन्यमान इव विघ्नशतोपलैस्तै
रुच्छिद्यमान इव दुःखकुठारधारैः ।
रोहत्यसौ विकसति प्रचितैः स्वशाखै-
रूर्ध्वं प्रयाति खलु जीवनवृक्ष एषः ।। 50



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

10. प्रस्थानलहरी

प्रस्थानवेला समुपागतेयं
शोको न युक्तोऽस्ति तथापि तेऽयम्
नेयं न दु:खान्नयनेऽश्रुधारं
सारं च सारं तर शोकपारम् । 1

मा ते व्यथा स्यान्न करोतु काल-
व्याल: कराल: स्वफटाप्रतानम्
सौख्याङ्कुराढ्य: समयालवाल:
पुष्पै: सुपर्णै रचयेद् वितानम् । 2

प्रस्थानवेला समुपागतेयं
देयो विदाय: सहजं च मह्यम्
हार्दं तु दु:खं कुरूतेऽनुतापं
चित्तं न धैर्यस्य जहातु वित्तम् । 3

यज्जीवनं जीवनमेव तत् स्या-
न्नैतत् कदाचिद् भवतु श्मशानम्
सादस्तवात्मानमतो न भिन्द्या-
च्छिन्द्यान्न शान्तिं न च धैर्यमानम् । 4

प्रस्थानवेला समुपागतेयं
हेला त्वदीये मनसीह केयम् ?
खेदो वियोगान्न च नो दुनोतु
क्लेशस्य लेशं न करोतु जातु । 5

कार्पण्यमेतन्ननु कीदृशं ते
छिनत्ति सौख्यं ह्यनिशं च शं ते
स्थैर्यस्य सूत्रे सहसा च कृत्ते
रेखां विधत्ते मसृणां स्वचित्ते । 6

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रस्थानकाले त्वसमञ्जसेन
व्यक्तीकृतं स्यान्न मनोगतं यत्
उत्कायमानं मनसीह तन्नो
चेतो दुनोतु प्रसभं कदाचित् । 7

ईतिश्च भीतिर्जगतश्च रीति-
स्त्वा खेदयेन्नैव तथा कुरीतिः
जायेत सग्धिश्च तथा सपीतिः
प्रीतिः पुराणी च समृद्धिमीयात् । 8

प्रस्थानगीतिः किल गुञ्जितेयं
भीतिस्त्वदीये मनसीह केयम्
आपृच्छमाने मयि गन्तुकामे
जोषं सतोषं खलु देह्यनुज्ञाम् । 9

साऽऽयातु मार्गे न कदापि माया
याऽऽपातरम्या परितापिनी च
छायानपायं विदधातु नित्यं
कादम्बिनीवत् सघने निदाघे । ।10

प्रस्थानकाले समुपागतेऽस्मिं-
स्ते ग्रन्थिबन्धा ननु मोचनीया
ये विक्लवत्वं किल कुर्वतेऽदो
मे मानसे वा तव मानसे वा । ।1

प्रस्थानवेला समुपागतेयं
जाड्यं च मान्द्यं हृदयाद् विनेयम्
वेला यथा लङ्घयितुं समर्थो
नो सागरः सोऽपि, नरो न कोऽपि । ।12

अग्रे पदं यावदितः प्रकुर्या
कश्चित् पदं कर्षति मे तु पृष्ठात्
सिन्धोः प्रवाहो गिरिणेव रुद्धो
नाग्रे प्रयातोऽस्मि न संस्थितोऽहम् । ।3

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रस्थानकाले मन एतदन्धं
गात्रं च विश्लेषितसन्धिबन्धम्
चेतो विषादेन विघूर्णमानं
तरस्तरङ्गेषु विहङ्गपोतः । ।4

पाथेयमेतन्मधुरं कराभ्यां
बद्धं पुटे चैव समर्पितं मे
भावाद् रसास्वाददशां प्रपन्नं
स्मृत्या तवेदं सहयातृ जातम् । ।5

द्वारं त्वया प्रा[illegible]गृहस्य वाह्यं
मे निर्गमायेदमपावृतं यत्
उक्त्वा न किञ्चिद्ध्वसितं मनाग् यत्
तन्मङ्गलं मेऽलमिदं तु मन्ये । ।6

मन्दस्मितं यच्च मम प्रयाणे
राराज्यते ते हि शुभाननेऽस्मिन्
तस्मिन् समग्रं हि मयानुभूतं
प्रस्थानकाले स्वशुभं निमित्तम् । ।7

यद् पूरितं कौतुकमङ्गलं मे
ते कौतुकं शान्तिमनेन गच्छेत्
निर्वेदनिर्वाणनिराकुलेयं
संसारयात्राऽस्तु निरन्तरैव । ।8

हास्यच्छटा लास्यमियं तनोति
ज्योत्स्नेव कामं वदने त्वदीये
उत्सारितः किन्तु कपोलदेशा-
न्नेत्रे गवाक्षे समुदेति शोकः । ।9

यात्रासु यात्रासु निरन्तरासु
प्रस्थाय भूयो भ्रमरानुवृत्या
अस्तित्वमेतन्नितरां मदीयं
विस्थापितं पिष्टमथार्धशिष्टम् । 20

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पूर्णं तु तूर्णं प्रकरोमि भूयः
स्वात्मानमेषोऽपि तथार्धशेषम्
प्रत्यागतो गेहमयं प्रवासात्
क्लेशात् प्रयातोऽस्मि पुनर्नवत्वम् । 2।

प्रस्थानवेलाकुलितं मनस्ते
विच्छेदभीत्या न भवेद् विभिन्नम्
छिन्नं प्रणष्टं यदिदं विलुप्तं
चावर्त्तमानं पुनरेति भूयः

प्रस्थानमेतच्च निवर्तनार्थं
जायेत कल्याणकरं त्वदर्थम्
आम्रोऽस्मि जातः सहकारवृक्ष-
श्छिन्नोऽपि भूयः प्रतिरोप्यमाणः । 23

अन्तं क्वचिन्मद्गमनेन सौख्यं
सौहार्दहृद्यं न तु यातु कान्ते
स्वान्ते वसन्तं बहिरुल्लसन्तं
द्रष्टुं समीहेऽत्र पुनर्वसन्तम् । 24

स्थाने त्वयानुष्ठित एव सर्वः
प्रस्थानकाले खलु मे प्रबन्धः
निर्बन्धमेतं किमु तत्करोषि
स्थित्वा दिनं यास्यसि चैकमेवम् ? 25

प्रस्थानकाले किल वस्तुजातं
किं किं नु नेयं किमु चैव हेयम्
एतत् तथैतच्च गृहाण सर्वं
चेत्याग्रहं मा कुरु चिन्तया त्वम् । 26

जीर्णं तु वासो नहि नेयमेतद्
वासेन ते यद्यपि वासितं स्यात्
नूनं नवीनं परिकल्पनीयं
वासो निवासो वसतान्यदेशे । 27

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यात्रासु यात्रासु सुरम्यदृश्यं
दृष्टौ समायाति यदा त्ववश्यम्
साकं त्वयैवाहमिदं हि सर्वं
पश्यामि चेत्थं तु विभावयामि । 28

विश्रम्य विश्रम्य विभिन्नदेश-
प्रदेशभागेषु विहृत्य कामम्
आगत्य चागत्य पुनः प्रयातो
यात्रावसानं प्रतिपालयामि । 29

आयामि पार्श्वे तव यामिनीनां
यामा यथैते पुनरापतन्ति
चङ्क्रम्यमाणो न जहामि नेमिं
चक्रारपङ्क्तौ भ्रमितोऽपि भूयः । 30

एतौ मुहुश्चङ्क्रमणश्रमार्तौ
पादौ मदीयौ परिपीड्यमानौ
कियच्चिरं श्राम्यसि भद्र चेत्थं
प्रश्नेन चोट्टङ्कयतो मनो मे । 31

पिण्डे यदेवास्ति तदेव सर्वं
ब्रह्माण्डभाण्डे प्रसृतं प्रभूतम्
दृश्यं विशिष्टं किमु तत्र शिष्टं
प्रस्थानकष्टं बहु येन जुष्टम् । 32

सूत्रं गृहीतं तव हस्त एव
कामं डयेऽहं तु पतङ्ग[1]-तुल्यः
सूत्रं यदा कर्षसि सत्वरं त्वं
नायामि पार्श्वे न विकृष्यमाणः । 33

तातप्यमानं खलु दह्यमानं
स्यादायसं पिण्डयुगं सुयुक्तम्
दुःखेन दुःखेन विभिद्यमाने
सन्धीयमाने मनसि तथैव । 34

---

[1] पतङ्गशब्दोऽत्र लोकप्रसिद्धेऽर्थे, सूत्रप्रोता उत्पात्यमाना पत्राकृतिरिति.

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रस्थानवेला परिहीयते मे
स्थातुं चिरं ते सविधे न शक्यम्
इहेह विदायं ह्यकुतोभयं ते
दायं समस्तं विसृजामि चात्र । 35

एषा जरोपेति यमस्य दूती
केशं गृहीत्वा पलिताग्रहस्ता
शब्दापयन्ती किल कर्णमूले
प्रस्थानवेलां विनिवेदयन्ती । 36

हास्ये सखीनां कलिताट्टहास्ये
कालस्य लास्यं प्रविलोकयामि
तूष्णीमकस्मात् प्रहसन्त एते
जायन्त एतेन भृशं विभेमि । 37

केचित् पुनः प्रस्थितवन्त एव
प्रस्थानमन्ये प्रतिपालयन्ति
स्थाने किलास्मिन् नियतां सदैव
देवो ददाति स्थितिमेष नैव । 38

जिघ्रामि मृत्युं पवनप्रकीर्णं
सोच्छ्वासमन्तःकरणे विदीर्णम्
प्रत्येकनिःश्वासविनिःसृतं तं
क्षणेऽत्र पश्यामि परित्यजन्तम् । 39

प्रस्थानकाले न पुरा प्रपूर्णाः
सञ्चिन्त्यमाना विविधा विभिन्नाः
सञ्चीयमानाश्च मनोरथा मां
राशीभवन्तोऽन्तरसि वाहयन्ति । 40

सन्नाह एषोऽस्ति वृथैव सर्वः
स्याद् व्यर्थकोयञ्च ममेति गर्वः
रिक्तो यथायं जन आगतोऽत्र
रिक्तेन गन्तव्यमितश्च तेन । 41

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अत्रोज्झितास्ते परमाणुपुञ्जाः
स्नेहस्य देहस्य निकेतनस्य
उच्छ्वासमात्रेण तु ये पुनस्तां
प्रेष्ठस्य कुर्वन्ति जनस्य सृष्टिम् । 42

शिष्टं विशिष्टं बहुकृत्यजातं
प्रस्थानकाले स्मृतिलोकयातम्
तद् यातनां तां विततां करोति
प्रत्युप्तमन्तर्हृदि वज्रशङ्कुः । 43

अर्थप्रकृत्या परिपोष्यमाणं
साबाधनिर्वाहितसन्धिबन्धम्
प्रस्तावनातो भरतस्य वाक्यं
यावत्कृतं जीवननाट्यमेतत् । 44

आरम्भयत्नौ विनिधीयमानौ
प्राप्तेस्तथाऽऽशा नियता तथाऽऽप्तिः
एता अवस्थास्तु मयानुभूता-
स्तत् केवलं निर्वहणं प्रतीक्षे । 45

प्रस्थानवेलान्तमिदं प्रवृत्तं
यन्नाट्यसूत्रं सहसाद्य कृत्तम्
कस्मै सुरक्ष्यः किल चात्र मानः
संसार एषोऽभिनयावसानः । 46

शौण्डापणद्वारमुपागतः सन्
कस्मादकस्माच्च निवर्तितोऽहम्
गच्छामि हट्टेप्यविघट्टमानः
विक्रेयपुञ्जाद् विनिवृत्तचक्षुः 47

प्रस्थानकाले ऽकृतकृत्यताभिः
शोच्यो न, शोकार्द्रमना न चाहम्
वाष्पोद्गमं स्तम्भितकण्ठवृत्तिं
पक्ष्मान्तरालेन नयस्व शोषम् । 48

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कालो निकृन्तन् किल मर्मतन्तून्
स्फोटं हृदन्तर्विदधात्यसह्यम्
कालो दधात्येव तथैव लेपं
तत्रामृतस्यापि यदा कदाचित् । 49

कामं करालं जगदस्मदीयं
कामं तथाऽवस्कराशिजुष्टम्
वासं तथाप्यत्र वरं तु मन्ये
स्वर्गाच्च संन्यासगतापवर्गात् । 50

देवालयाद् भक्तिसुखात् प्रभोर्वा-
सायुज्यलाभात् किल ब्रह्मभावात्
मन्ये वरं ते सविधे निवासं
क्लेशाकुलेऽस्मिन् जगति प्रकामम् । 51

प्रस्थानकाले किल सान्ध्यकाले
दीपप्रभां द्योतय चान्धकारे
चिह्नं पदक्षेपकृतं स्वकीयं
पश्यामि, तेनैव परागतः स्याम् । 52



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राधावल्लभस्य प्रकाशितपुस्तकानि

शोध समीक्षा

1. भारतीय धर्म और संस्कृति (सहलेखन, 1972)
2. संस्कृत कवियों के व्यक्तित्व का विकास (1976, पुरस्कृत)
3. आदिकवि वाल्मीकि (1980)
4. काव्यशास्त्र और काव्य (1982)
5. न्यायसत्रम् (1984)
6. संस्कृत साहित्य को इस्लाम परंपरा का योगदान (संपादित, 1986)
7. संस्कृत कविता की लोकधर्मी परंपरा (1986)
8. महाकवि भवभूति और उनका नाट्यलोक (सहसंपादन, 1986)
9. नाट्यशास्त्र के बीज शब्द (सहलेखन, भाग 1, 2)
10. अप्राप्तनाट्य शास्त्रीय ग्रंथ (संपादित, 1987)
11. कालिदास परिशीलन (संपादित, 1988)
12. कालिदास की समीक्षा-परंपरा (1988)
13. भारतीय नाट्य : स्वरूप और परंपरा (1988)
14. सूत्रधार-वृत्त (सह-लेखन)
15. संस्कृत रूपकों में प्रहसन (1991)
16. राष्ट्र की एक .. में संस्कृत का योगदान (1991)
17. LECTURES ON NATYAS'ASTRA
18. INDIAN TRADITIONS IN LINGUISTICS

अनूदितानि

1. वेदांतसार (1976)
2. कुंदमाला (पुरस्कृत 1982)
3. प्रबुद्धरौहिणेय (1983)
4. कुमारसम्भव (1984)
5. अभिज्ञानशाकुन्तल (1985)
6. मेघदूत (1986)
7. भरटकद्वात्रिंशिका (1987)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतरचनाः

1. प्रेमपीयूषम् नाटक (1971)
2. महाकविः कण्टकः (1971)
3. वाल्मीकि-विमर्शः (1979)
4. नाट्यमण्डपम् (1980)
5. भारतीयरङ्गसमुन्मेषः (1981)
6. सन्धानम् - मौलिक संस्कृत काव्य संग्रहः (1989)
7. लहरीदशकम् (1991)

हिन्दीरचनाः

1. पूर्वरंग (कहानी संग्रह, 1978)
2. सत्रांत (उपन्यास, 1979)
3. पागल हाथी (1985)
4. जो मिटती नहीं है (कहानी संग्रह, 1989)
5. दमयन्ती (नाटक, पुरस्कृत 1990)
6. भुवनदीप (नाटक, 1991)

संपादित-काव्यानि/संकलनानि

1. नीलकण्ठदीक्षितकृत मुकुन्दविलास महाकाव्यम् (1980),
2. नवस्पन्दः (1988)
3. त्रयी (1988)
4. चतुष्टयी (1988)
5. अर्थगौरवम् (1988)
6. संक्षिप्तनाट्यशास्त्रम्
7. आयतिः - संस्कृत काव्य संग्रह
8. प्रख्या-1 — संकलन
9. षोडशी- (समकालिकसंस्कृतकाव्यस्य प्रतिनिधिसंकलनम्, 1992)

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi